# सुभाषित व्याकरण - ३४
## Subhashit Grammar - 34

Compiler: Kishore Nayak
Editor: Padmakar Gangatirkar

गुरुवार आषाढ शुक्ल षष्ठी १९४६, क्रोधी संवत्सर

**न विप्रपादोदककर्दमानि न वेदशास्त्रध्वनिगर्जितानि।**
**स्वाहास्वधास्वस्तिविवर्जितानि, श्मशानतुल्यानि गृहाणि तानि** ॥ २६७॥--चाणक्यनीतिदर्पण अ.१२ श्लो. १०

न विप्र-पादोदक-कर्दमानि, न वेद-शास्त्र-ध्वनि- गर्जितानि, स्वाहा-स्वधा-स्वस्ति-विवर्जितानि, तानि गृहाणि श्मशान-तुल्यानि (भवन्ति)॥

The homes, where there is no hospitality extended to learned men, where there are no resounding chants of Vedas & scriptures and which are devoid of oblations, respect for the departed souls or invoking of blessings for well-being, are like crematoriums.

विप्रपादोदककर्दमानि, वेदशास्त्रध्वनिगर्जितानि, स्वाहास्वधास्वस्तिविवर्जितानि, तानि, गृहाणि, श्मशानतुल्यानि- all in न. लिं. प्र. पु. ब. व. of विप्रपादोदककर्दमम्- water remaining after washing feet of learned men (implying hospitality of learned men')- विप्रः- a member of a priestly class, learned man, पादः-foot, उदकम्- water, कर्दमम्- slush- विप्रस्य पादस्य उदकस्य कर्दमम्- compound ष. तत्पुरुष स., वेदशास्त्रध्वनिगर्जितम्- one that is resounding with echoes of Vedas वेद- sacred scripture- Veda, शास्त्र- scripture, treatise, precept, ध्वनि- sound, गर्जितम्- roared, resounding- गर्जित- क. भू. धा. वि. of गर्ज्- गर्जति १ ग. प. प. to roar- वेदस्य शास्त्रस्य ध्वनिः- वेदशास्त्रध्वनिः - ष. तत्पुरुष स. & वेदशास्त्रध्वनिना गर्जितम् - तृ. तत्पुरुष स., स्वाहास्वधास्वस्तिविवर्जितम्- one that is devoid of worship of Gods, Pitrus- (Manes) or invoking of blessings for well-being- स्वाहा, स्वधा & स्वस्ति- all अव्ययs- first two are exclamations used in offering oblation to the Gods & Manes (पितृs) resply. & the last one is exclamation of Well-being, 'May well be with (one)- विवर्जितम्- devoid of, absence of- विवर्जित- क. भू. धा. वि. of वि+ वृज्- to shun, avoid- (वृज्- वर्जति १ ग. प. प. to give up, abandon)- स्वाहा च स्वधा च स्वस्ति च- द्वंद्व स & स्वाहास्वधास्वस्ति-ध्वनि विवर्जितम्- म. प. लोपी कर्मधारय स., तद्- that, गृहम्- house, residence & श्मशानतुल्यम्- comparable to cremation ground- श्मशानम्- cremation ground, तुल्यम्- similar, like, resembling- श्मशानेषु तुल्यम्- स. तत्पुरुष स., न- no, not- अव्यय

**सत्यं माता पिता ज्ञानं धर्मो भ्राता दया सखा।**
**शान्तिः पत्नी क्षमा पुत्रः षडेते मम बान्धवाः**॥२६८॥ -चाणक्यनीतिदर्पण अ. १२ श्लो. ११
पा. भे.: सखा = स्वसा

सत्यम् माता, ज्ञानम् पिता, धर्मः भ्राता, दया सखा (स्वसा), शान्तिः पत्नी (तथा) क्षमा (मम) पुत्रः (भवति)। एते षड् मम बान्धवाः (सन्ति) ॥

Truth is my mother, knowledge is my father, my Dharma is my brother, compassion is my companion /sister, peace of mind is my wife (husband) and forbearance is my son. These six are my kinsmen.

सत्यम्- truth, honesty & ज्ञानम्- knowledge- both in न. लिं. प्र. वि. ए. व., understanding, intelligence, माता (मातृ)- mother, दया- compassion, mercy, sympathy, स्वसा- (स्वसृ)- sister, शान्तिः- tranquility, absence of passion, cessation of hostility, पत्नी- wife & क्षमा- forgiveness, tolerance- all in स्त्री. लिं. प्र. वि. ए. व., पिता (पितृ)- father, धर्मः- prescribed codes of conduct- Dharma, भ्राता (भ्रातृ,)- bother, सखा (सखि)- a friend, companion, पुत्रः-son, child- all in पु. लिं. प्र. वि. ए. व., बान्धवाः, एते- these & षड्-

all in पु. लिं. प्र. वि. ब. व. of बान्धवः- relative, kinsman, एतद्- this & षष्- six, मम- my- ष.वि. ए. व. of अस्मद्- ।

**अनित्यानि शरीराणि वैभवं नैव शाश्वतम्।**
**नित्यं सन्निहितो मृत्युः कर्तव्यो धर्मसङ्ग्रहः**॥२६९॥ -चाणक्यनीतिदर्पण अ. १२ श्लो. १२
पा.भे.: वैभवं नैव शाश्वतम्- विभवो नैव शाश्वतः

शरीराणि अनित्यानि (सन्ति)। वैभवम् न एव शाश्वतम् (विभवः न एव शाश्वतः) (अस्ति)। मृत्युः नित्यम् सन्निहितः (भवति)। (तद् कारणात्, मनुष्यस्य) कर्तव्यः धर्मसङ्ग्रहः (एव भवति) ॥

Bodies of living beings are perishable. Wealth is not permanent. Death is always nearby. (Therefore), it is one's duty to collect (as many) righteous deeds (as possible).

शरीराणि & अनित्यानि- both in न. लि. प्र. वि. ए. व. of शरीरम्- body & अनित्यम्- transient, perishable, not eternal- नित्य- adjctv- perpetual, eternal, constant- न नित्य- अनित्य- नञ् तत्पुरुष स., वैभवम्- न. लिं. & विभवः- पु. लिं- wealth, riches, glory, power, शाश्वतम् /शाश्वतः- permanent, eternal, everlasting- all in प्र. वि. ए. व., मृत्युः- death, सन्निहितः- lying close by, proximately, near- सन्निहित- क. भू. धा. वि. of सत् +नि+ हि- (हि- हिनोति ५ ग. प. प.- to send forth, cast, discharge), धर्मसङ्ग्रहः- accumulation of meritorious deeds- धर्मः- meritorious deed, सङ्ग्रहः- collection, gathering- धर्मस्य सङ्ग्रहः- ष. तत्पुरुष स., कर्तव्यः- that ought to be done, duty- कर्तव्य (also करणीय, कार्य & कृत्य)- क. वि. धा. सा. वि. of कृ- करोति कुरुते ८ ग. उ. प. to do- all in पु. लिं. प्र. वि. ए. व., न- no, not, एव- just, only, merely, नित्यम्- daily, always, constantly- all अव्ययs

**आमन्त्रणोत्सवा विप्रा गावो नवतृणोत्सवाः ।**
**पत्युत्साहयुता नार्यः अहं कृष्ण-रणोत्सवः** ॥२७०॥ -चाणक्यनीतिदर्पण अ. १२ श्लो. १३
पा.भे.: आमन्त्रणोत्सवा=निमन्त्रणोत्सवा, नार्यः= भार्याः

विप्राः आमन्त्रण-उत्सवाः (भवन्ति) । गावः नव- तृण-उत्सवाः (भवन्ति) । पति-उत्साह-युताः नार्यः (भवन्ति) । अहम् (चाणक्यः तु) कृष्ण-रणोत्सवः (अस्मि)॥

The educated people are eager for invitations (to various conferences, festivals etc). The cows relish fresh grass. Wives) are bound with energy (desire) in their husbands. But Chanakya says: I am interested in a real severe battle.

आमन्त्रणोत्सवाः, नवतृणोत्सवाः, विप्राः & गावः- all in पु. लिं. प्र. वि. ब. व. of आमन्त्रणोत्सवः- one, who rejoices on getting invitation to visit- आमन्त्रणम्- calling invitation, उत्सवः- joy, merriment, festival- आमन्त्रणम् उत्सवः यस्य सः- बहुव्रीहि स., नवतृणोत्सवः- one, who enjoys tender lushgreen grass- नवम्- adjctv- new, fresh, तृणम्- grass, नवम् तृणम्- वि. पू. प. कर्मधारय स. & नवतृणम् उत्सवः यस्य सः- बहुव्रीहि स., विप्रः- a member of a priestly class, learned man & गो- cattle, bull/cow, पत्युत्साहयुताः & नार्यः (भार्याः)- both in स्त्री. लिं. प्र. वि. ब. व. of पत्युत्साहयुता- bound with energy in husband- पतिः- husband, master, उत्साहः- energy, effort, inclination, desire, युत- united, provided or endowed with- क. भू. धा. वि. of यु- यौति २ ग. प. प. to unite, bind- उत्साहेन युता- उत्साहयुता- तृ. तत्पुरुष स. & पत्यौ उत्साहयुता- स. तत्पुरुष स. & नारी-

woman, (भार्याः- wife), अहम्- (अस्मद्)- I & कृष्ण-रणोत्सवः- one, who enjoys severe battles- कृष्ण- adjctv- black, evil, wicked, severe, रणः- war, battle- कृष्णः रणः- वि. पू. प. कर्मधारय स. & कृष्णरणः उत्सवः यस्य सः- बहुव्रीहि स.- both in पु. लिं. प्र. वि. ए. व.

**धर्मे तत्परता मुखे मधुरता दाने समुत्साहता**
**मित्रेऽवञ्चकता गुरौ विनयता चित्तेऽतिगम्भीरता।**
**आचारे शुचिता गुणे रसिकता शास्त्रेषु विज्ञानता**
**रूपे सुन्दरता शिवे भजनता त्वय्यस्ति भो राघव**॥२७१॥ -चाणक्यनीतिदर्पण अ. १२ श्लो. १५
पा.भे.: त्वय्यस्ति भो राघव= सत्स्वेव सन्दृश्यते

भोः राघव ! धर्मे तत्परता, मुखे मधुरता, दाने समुत्साहता, मित्रे अवञ्चकता, गुरौ विनयता, चित्ते अति- गम्भीरता, आचारे शुचिता, गुणे रसिकता, शास्त्रेषु विज्ञानता, रूपे सुन्दरता, शिवे भजनता, त्वयि अस्ति /सत्सु एव सन्दृश्यते॥

Oh Raghav! These qualities are with you - Complete devotion to 'Dharma', pleasantness in the talk, energitic efforts in giving, honesty with friends, politeness with elders, great profoundness of mind, purity in behaviour, tastefulness in quality, thorough knowledge of scriptures, handsome in appearance and worship towards God Almighty.

(These qualilties can be witnessed only in noble people.)

धर्मे, गुरौ, आचारे, गुणे, शिवे- all in पु. लिं. स. वि. ए. व. of धर्मः- prescribed codes of conduct, Dharma, गुरुः- teacher, elder, father, preceptor, आचारः- good behaviour, conduct, गुणः- virtue, quality, शिवः- Shiva, God, मुखे, दाने, मित्रे, चित्ते & रूपे- all in न. लिं. स. वि. ए. व. of मुखम्- face, mouth, दानम्- charity, act of giving, मित्रम्- a friend, चित्तम्- thought, mind, heart & रूपम्- figure, form, appearance, शास्त्रेषु- in न. लिं. स. वि. ब. व. of शास्त्रम्- sacred percept, spiritual injunction, religious treatise, सत्सु- in पु. लिं. स. वि. ब. व. of सत्- noble, virtuous saintly, तत्परता- exclusive devotion, मधुरता- pleasantness, समुत्साहता- sincere effort, अवञ्चकता- honesty, विनयता- politeness, अतिगम्भीरता- very profoundness, शुचिता- purity in action, रसिकता- tastefulness, विज्ञानता- intelligence, सुन्दरता- handsomeness, भजनता- worshipfulness- all in स्त्री. लिं. स. वि. ए. व.- ता suffix to an adjctv or a word derived from a verb implies quality, nature- तत्पर (तद्+ पर)- exclusively devoted to, closely intent on, मधुर- sweet, pleasant, समुत्साहः- good inclination, desire, effort, अवञ्चकः- dependable, honest- (वञ्चकः- a cheat, rogue, deceitful- न वञ्चकः- अवञ्चकः- नञ् तत्पुरुष स.), विनयः- polite conduct, decency, अतिगम्भीरः- very profound, earnest, serious- (अति- अव्यय- a prefix implies very much, high), शुचिः- purity, upright, undefiled, रसिकः- tasteful, impassioned, विज्ञानम्- knowledge, wisdom, understanding, सुन्दरः- elegant, beautiful, भजनम्- worship, service, राघव- of Raghu' s family- Rama- in पु. लिं. सं. वि. ए. व., त्वयि- in you- स. वि. ए. व. of युष्मद्- you- अस्ति- वर्त. प्र. पु. ए. व. of अस्- to be, to exist, सन्दृश्यते- कर्मणि प्रयोग वर्त. प्र. पु. ए. व. of सं+ दृश्- to see well, perceive- (दृश्- पश्यति १ ग. प. प. to see, look at) एव- only, just, merely, भोः (भोस्)- a vocative particle- Oh Sir- both अव्ययs

**काष्ठं कल्पतरुः सुमेरुरचलश्चिन्तामणिः प्रस्तरः**
**सूर्यः तीव्रकरः शशी क्षयकरः क्षारः हि वारांनिधिः।**

**कामो नष्टतनुर्बलिर्दितिसुतो नित्यं पशुः कामगौः**
**नैतांस्ते तुलयामि भो रघुपते कस्योपमा दीयते** ॥२७२॥ -- चाणक्यनीतिदर्पण अ. १२ श्लो. १६

कल्पतरुः काष्ठम्, सुमेरुः अचलः, चिन्तामणिः प्रस्तरः, सूर्यः तीव्रकरः, शशी क्षयकरः, वारांनिधिः क्षारः हि, कामः नष्टतनुः, बलिः दितिसुतः, कामगौः नित्यम् पशुः, भोः रघुपते, ते एतन् न तुलयामि। (ते) कस्य उपमा दीयते?

The wish yielding tree, Kalpataru, is just timber wood. Mighty Meru is immovable. The wish granting gem, Chintamani, is just a piece of rock. The Sun is very hot and the Moon is waning. The ocean is too salty. The God of love, Madan, has lost his body. The mighty King Bali is a demon. The wish-granting cow Kamdhenu is just an animal. Oh Raghupati, I will not compare you with anyone of these. Is there anybody with whom you can be compared?

काष्ठम्- wood, timber- in न. लिं. प्र. वि. ए. व., कल्पतरुः- wish yielding tree- कल्पप्रदः तरुः-उ. प. लो. कर्मधारय स. (क्लृप्- कल्पते १ ग. आ. प. to be fit or adequate for, produce- कल्पित- desired, wished for), सुमेरुः- the sacred mountain Meru, अचलः- immovable, fix- (चलः- mobile- न चलः- अचलः- नञ् तत्पुरुष स.), चिन्तामणिः- wish granting gem- चिन्ता- thought, thinking, मणिः- gem, jewel- चिन्ताप्रदः मणिः- म. प. लो. कर्मधारय स., प्रस्तरः- a stone, rock, सूर्यः- the Sun, तीव्रकरः- very hot, causing great heat- तीव्र- adjctv- severe, intense, sharp, hot, तीव्रम्- heat, करः- doer- तीव्रम् करोति इति & क्षयकरः- waning, diminishing- क्षयः- decay, decline- क्षयम् करोति इति - क्षयकरः - both उपपद तत्पुरुष स., शशी (शशिन्)- the Moon, क्षारः- corrosive, salty, वारांनिधिः- ocean- वार्- न. लिं- water, निधिः- treasure, storehouse- वाराम् निधिः- ष. तत्पुरुष स., कामः- God of love- नष्टतनुः- without a body- नष्ट- ruined, lost- क. भू. धा. वि. of नश्- नश्यति ४ ग. प. प. to be lost, तनुः- body- नष्टः तनुः - कर्मधारय स स., बलिः- Mighty King Bali, दितिसुतः- a demon- 'Daitya' -दितिः- wife of Kashyap- mother of demons, सुतः- son- दितेः सुतः- ष. तत्पुरुष स., पशुः- an animal- all in पु. लिं. प्र. वि. ए. व., कामगौः- wish granting cow- in स्त्री. लिं. प्र. वि. ए. व.- कामः - desire, wish, गौः (गो)- cow/bull- कामप्रदः गौः- म. प. लो. कर्मधारय स., एतन्- them- in पु. लिं. द्वि. वि. ब. व. of एतद्- he, ते- (तुभ्यम्)- in पु. लिं. च. वि. ए. व. of युष्मद्- you, तुलयामि- उ. पु. ए. व. of तुल्- १० ग. उ. प. तोलयति- ते or तुलयति- ते which is supposed to be a denominative from तुला), रघुपते- in पु. लि. सं वि. ए. व. of रघुपतिः- Rama- रघूणाम् पतिः- ष. तत्पुरुष स., कस्य- whose- पु. लिं. ष. वि. ए. व. of किम्- who, दीयते- कर्मणि प्रयोग प्र. पु. ए. व. of दा- ददाति- दत्ते ३ ग. उ. प. to give, हि- indeed, surely, न- no, not, नित्यम्- always, daily, उपमा- (स्त्री. लिं.)- Similarity, comparison, भोः (भोस्)- a vocative particle: Oh Sir- all अव्ययs

**विनयं राजपुत्रेभ्यः पण्डितेभ्यः सुभाषितम् ।**
**अनृतं द्यूतकारेभ्यः स्त्रीभ्यः शिक्षेत कैतवम्** ॥२७३॥ -चाणक्यनीतिदर्पण अ. १२ श्लो. १८

(मनुष्यः) राजपुत्रेभ्यः विनयम्, पण्डितेभ्यः सुभाषितम्, द्यूतकारेभ्यः अनृतम् (तथा) कैतवम् स्त्रीभ्यः शिक्षेत॥

One should learn discipline from the princes, witty sayings from the learned people, deceit from the gamblers and tricks from the women.

(*I personally do not agree with the last one)*

विनयम्- in पु. लि. द्वि. वि. ए. व. of विनयः- discipline, modesty, सुभाषितम्- decorum, breeding or manners- सु-अव्यय- prefix implies good, well, भाषित-spoken, said- क. भू. धा. वि. of भष्- भाषते १ ग.

आ. प. to say, speak- सुभगम् भाषितम्- प्रादि कर्मधारय स., अनृतम्- lying, false, untruthful- ऋतम्- truth, factual- न ऋतम्- नञ् तत्पुरुष स. & कैतवम्- trick, deceit, device- all in न. लि. द्वि. वि. ए. व., राजपुत्रेभ्यः, पण्डितेभ्यः & द्यूतकारेभ्यः- all in पु. लि. पं. वि. ब. व. of राजपुत्रः- prince, King's son- राजन्- King & पुत्रः- son- राज्ञः पुत्रः- ष. तत्पुरुष स., पण्डितः- scholar, learned or wise man & द्यूतकारः- gambler- द्यूतः- gambling, कारः- doer- द्यूतम् करोति इति- उपपद तत्पुरुष स., स्त्रीभ्यः- in स्त्री. लि. पं. वि. ब. व. of स्त्री- woman, female, शिक्षेत- विध्यर्थ प्र. पु. ए. व. of शिक्ष्- शिक्षते १ ग. आ. प. to learn, acquire

**नाहारं चिन्तयेत्प्राज्ञो धर्ममेकं हि चिन्तयेत् ।**
**आहारो हि मनुष्याणां जन्मना सह जायते**॥२७४॥ - चाणक्यनीतिदर्पण अ. १२ श्लो. २०

प्राज्ञः आहारम् न चिन्तयेत्। (सः) धर्मम् एकम् हि चिन्तयेत्। मनुष्याणाम् आहारः जन्मना सह हि जायते॥

A wise man should not worry about food. He should only focus on his Dharma. Food requiremenst to feed the people is produced along with their births.

आहारम्, धर्मम् & एकम्- one, alone- all in पु. लिं. द्वि. वि. ए. व. of आहारः- food, diet & धर्मः- prescribed codes of practice- 'Dharma', प्राज्ञः- a wise or sensible man & आहारः- both in पु. लिं. प्र. वि. ए. व., चिन्तयेत्- विध्यर्थ प्र. पु. ए. व. of चिन्त्- चिन्तयति- ते १० ग. उ. प. to think, consider, ponder over, मनुष्याणाम्- in पु. लिं. ष. वि. ब. व. of मनुष्यः- a man, person, जन्मना- in न. लिं. तृ. वि. ए. व. of जन्मन्- birth, जायते- वर्त. प्र. पु. ए. व. of जन्- ४ ग. आ. प. to be born, produced, न-no, not, हि- indeed, surely, certainly, सह- with, together- all अव्ययs

**मुहूर्तमपि जीवेद्वै नरः शुक्लेन कर्मणा।**
**न कल्पमपि कृष्णेन लोकद्वयविरोधिना**॥२७५॥- चाणक्यनीतिदर्पण अ.१३, श्लो.१

नरः मुहूर्तम् आपि शुक्लेन कर्मणा जीवेत् वै। न कल्पम् अपि कृष्णेन लोकद्वयविरोधिना (कर्मणा जीवेत्) ॥

It is better that a person live for short time with a record of right deeds than survive millions of years doing evil deeds which are opposed in the two worlds. (One that we are living here and that after the death in the other world).

नरः- a man- in पु. लिं. प्र. वि. ए. व., मुहूर्तम् & कल्पम्- both in पु. लिं. द्वि. वि. ए. व. of मुहूर्तः- moment, a small duration, instant & कल्पः- millions of years (432 million years), जीवेत्- विध्यर्थ प्र. पु. ए. व. of जीव्- जीवति- १ ग. प. प. to live, to be alive, survive, शुक्लेन, कर्मणा, कृष्णेन, कष्टेन & लोकद्वयविरोधिना- all in तृ. वि. ए. व. of शुक्ल- adjctv- white, pure, bright, कर्मन्- न. लिं- work, deed, कृष्ण/ कष्ट- adjctv- black, disgraceful, bad, evil, wrong & लोकद्वयविरोधिन्- adjctv- one which is opposed to interest of both worlds- लोकम्- world, द्वयम्- a pair, couple, विरोधिन्- opposing, contradicting, resisting, inconsistent with- द्वयम् लोकम्- वि. उ. प. कर्मधारय स. & लोकद्वयस्य विरोधिन् - ष. तत्पुरुष स., अपि -also, even, वै- a particle of affirmation, certainty, च- and, न- no, not- all अव्ययs

**स्वभावेन हि तुष्यन्ति देवाः सत्पुरुषाः पिता ।**
**ज्ञातयः स्नानपानाभ्यां वाक्यदानेन पण्डिताः** ॥२७६॥ - चाणक्यनीतिदर्पण अ. १३ श्लो. ३
पा.भे.: स्नानपानाभ्यां = त्वन्नपानाभ्यां

देवाः, सत्पुरुषाः (तथा) पिता स्वभावेन हि तुष्यन्ति। ज्ञातयः स्नान-पानाभ्याम् / तु- अन्नपानाभ्याम् (तुष्यन्ति)। पण्डिताः वाक्यदानेन (तुष्यन्ति)।

Gods, saintly persons and one's father (parents) are content by their inherent nature. Relatives are satisfied with good hospitality of food and drinks. Wise men are happy with just the cultured talk.

देवाः, सत्पुरुषाः, ज्ञातयः & पण्डिताः- all in पु. लिं. प्र. वि. ब. व. of देवः- God, सत्पुरुष- noble, saintly person, ज्ञातिः- kinsman, relative & पण्डितः- a scholar, learned man, पिता- in पु. लिं. प्र. वि. ए. व. of पितृ- father, स्वभावेन- in पु. लिं. तृ. वि. ए. व. of स्वभावः- inherent nature, quality, disposition- स्व- pronominal adjctv- one's own, oneself, भावः- disposition, nature- स्वस्य भावः- ष. तत्पुरुष स., वाक्यदानेन- in न. लिं. तृ. वि. ए. व. of वाक्यदानम्- good exchange of words, talking- वाक्यम्- a sentence, speech, words, दानम्- giving- वाक्यस्य दानम्- ष. तत्पुरुष स., स्नानपानाभ्याम्/ अन्नपानाभ्याम्- both in न. लिं. तृ. वि. द्वि. व. of स्नानपानम्- bath and drink- स्नानम्- bath, bathing, पानम्- drink, drinking- स्नानम् च पानम् च/ अन्नपानम्- food and drink- अन्नम्- food, rice- अन्नम् च पानम् च- both द्वंद्व स., तुष्यन्ति- वर्त. प्र. पु. ब. व. of तुष्- तुष्यति ४ ग. प. प. to be pleased, satisfied, happy, हि- indeed, surely, certainly & तु- but, on the other hand- both अव्ययs

**अहो बत विचित्राणि चरितानि महाऽऽत्मनाम्।**
**लक्ष्मीं तृणाय मन्यन्ते तद्भारेण नमन्ति च** ॥२७७॥ - चाणक्यनीतिदर्पण अ. १३ श्लो. ४

अहो बत महाऽऽत्मनाम् चरितानि विचित्राणि (भवन्ति) । (ते) लक्ष्मीम् तृणाय मन्यन्ते, (परन्तु ते) तद्भारेण नमन्ति च॥

Oh look, the behaviour of these great souls is indeed amazing! They consider wealth as a straw, but they bow down under its weight!

महाऽऽत्मनाम्- in पु. लि. ष. वि. ब. व. of महाऽऽत्मन्- a great person, magnanimous man- महत्- adjctv- high, great, noble, आत्मन्- soul, mind- महान् आत्मा यस्य सः- बहुव्रीहि स., चरितानि & विचित्राणि- both in न. लि. प्र. वि. ब. व. of चरितम्- behaviour, practice, act, doing- चरित- क. भू. धा. वि. of चर्- चरति १ ग. प. प. to walk, go about, practice, perform & विचित्रम्- adjctv- varied strange, wonderful, surprising, लक्ष्मीम्- in स्त्री. लि. द्वि. वि. ए. व. of लक्ष्मीः- wealth, riches, Goddess of wealth, तृणाय- in न. लि. च. वि. ए. व. of तृणम्- a blade of grass, straw, reed, तद्भारेण- in न. लि. तृ. वि. ए. व. of तद्भारम्- weight of that- तद्- that, it, भारम्- load, weight- तस्य भारम्- ष. तत्पुरुष स., नमन्ति & मन्यन्ते- वर्त. प्र. पु. ब. व. of नम्- नमति- ते १ ग. उ. प. to bow, bend & मन्- मन्यते ४ ग. आ. प. to think, consider, believe, अहो- a particle showing surprise or wonder- Oh, बत- a particle used for addressing, calling (with wonder, surprise), च- and- all अव्ययs

**जीवन्तं मृतवन्मन्ये देहिनं धर्मवर्जितम्।**
**मृतो धर्मेण संयुक्तो दीर्घजीवी न संशयः** ॥२७८॥ - चाणक्यनीतिदर्पण अ. १३ श्लो. ८

(अहम्) जीवन्तम् धर्मवर्जितम् देहिनम् मृतवत् मन्ये। मृतः धर्मेण संयुक्तः दीर्घजीवी (भवति। अत्र) न संशयः (अस्ति)॥

(Chanakya says)
"(I) consider a living person, who does not follow righteous way of life (Dharma), as good as dead. (On the contrary), a dead person, who had strictly followed Dharma lives for a long time. (There is) no doubt (about that)."

जीवन्तम्, धर्मवर्जितम् & देहिनम्- all in पु. लि. द्वि. वि. ए. व. of जीवन्तः- living, alive, धर्मवर्जितः- one who is devoid of any prescribed codes of conduct, one who does not follow righteous way of life (Dharma)- धर्मः- prescribed codes of conduct- 'Dharma', वर्जितः- devoid of, absence of- वर्जित- क. भू. धा. वि. of वृज्- वर्जति १ ग. प. प. to give up, abandon- धर्मेण वर्जितः- तृ. तत्पुरुष स. & देहिन्- a living being, man, मृतवत्- as good as dead- in न. लिं. प्र. वि. ए. व.- मृतः- dead person- मृत- क. भू. धा. वि. of मृ- म्रियते ६ ग. आ. प. to die, decease, वत्- suffix implies quality, nature, मन्ये- उ. पु. ए. व. of मन्- मन्यते ४ ग. आ. प. to think, consider, मृतः- a dead, संयुक्तः- accompanied by, possessed of- संयुक्त- क. भू. धा. वि. of सं+ युज्- to be with- (युज्- युनक्ति- युंक्ते ७ ग. उ. प. to join, deploy, to be with), दीर्घजीवी-one with a long life- दीर्घ- adjctv- long, extended, जीविन्- adjctv- living, alive, existing- दीर्घः जीविन्- वि. पू. प. कर्मधारय स., संशयः- doubt, uncertainty- all in पु. लिं. प्र. वि. ए. व., धर्मेण- in पु. लि. तृ. वि. ए. व. of धर्मः- see above, न- no, not अव्ययः

**देहाभिमाने गलिते विज्ञाते परमात्मनि।**
**यत्र यत्र मनो याति तत्र तत्र समाधयः** ॥२७९॥ - चाणक्यनीतिदर्पण अ. १३ श्लो. १२/११

(मनुष्यस्य), देहाभिमाने गलिते, (तस्य) परमात्मनि विज्ञाते, यत्र यत्र (तस्य) मनः याति, तत्र तत्र समाधयः (वर्तन्ते)।

After shedding attachment to his body and realising the Supreme Spirit, one finds total bliss wherever his mind wanders,.

देहाभिमाने, गलिते, परमात्मनि & विज्ञाते- पु. लिं. स. वि. ए. व. of देहाभिमानः- attachment towards the body- देहः/देहम्- body, अभिमानः- pride, attachment- देहस्य अभिमानः- ष. तत्पुरुष स., गलितः- vanished dropped, lost, loosened- गलित- क. भू. धा. वि. of गल्- गलति १ ग. प. प. to drop, fall, परमात्मन्- Supreme-spirit, God Almighty- परमात्मन्- परम- adjctv- Supreme, the highest, best,आत्मन्- soul, self, spirit- परमः आत्मा- परमात्मा- वि. पू. प. कर्मधारय स. & विज्ञातः- realised, understood, known- विज्ञात- क. भू. धा. वि. of वि+ ज्ञा- to realise, comprehend- (ज्ञा- जानाति जानीते ९ ग. उ. प. to know, understand), मनः- in न. लिं. प्र. वि. ए. व. of मनस्- mind, thought, याति- वर्त. प्र. पु. ए. व. of या- २ ग. प. प. to go, reach, समाधयः- in पु. लिं. प्र. वि. ब. व. of समाधिः- concentration/ composing of mind, perfect absorption of thought into Supreme Spirit, यत्र- where at which place- यत्र यत्र- wherever, तत्र- there, in that place- तत्र तत्र- at all those places, everywhere- both अव्ययs

**ईप्सितं मनसः सर्वं कस्य सम्पद्यते सुखम्।**
**दैवाऽऽयत्तं यतः सर्वं तस्मात्सन्तोषमाश्रयेत्**॥२८०॥ - चाणक्यनीतिदर्पण अ. १३ श्लो. १३/१२

यतः सर्वम् दैवाऽऽयत्तम्, मनसः ईप्सितम् सर्वम् सुखम् कस्य सम्पद्यते? तस्मात् (मनुष्यः) सन्तोषम् आश्रयेत्॥

Since everything depends on destiny, who can achieve every happiness he desires in his mind? Therefore, one should be satisfied (with whatever he is able to get).

सर्वम्- pronominal adjctv- all, entire, everything, दैवाऽऽयत्तम्- dependent on destiny- दैवम्- destiny, fate, luck, concerning God- आयत्तम्- resting upon, dependent on- आयत्त- क. भू धा. वि. of आ+ यत्- to endeavour, attempt, to rest or depend upon- (यत्- यतते १ ग. आ. प. to attempt, to try- दैवेण आयत्तम्- तृ तत्पुरुषस. & ईप्सितम्- adjctv- desired, wished for, dear to- all in न. लि. प्र. वि. ए. व., सुखम्- adverb- by ease, without pain, happily, कस्य- whose/whom- in पु. लि. ष. वि. ए. व. of किम्- who, सम्पद्यते- वर्त. प्र. पु. ए. व. of सं+ पद्- to bring about, to obtain, acquire, get- (पद्- पद्यते ४ ग. आ. प. to go, move, attain, gain), सन्तोषम्- satisfaction, happiness, joy- in न. लि. द्वि. वि. ए. व., आश्रयेत्- विध्यर्थ प्र. पु. ए. व. of आ+ श्रि- to resort to, to have recourse to- (श्रि- श्रयति- ते to approach, go to, यतः (यतस्)- since, as, because, wherefore, तस्मात्- therefore, hence- both अव्ययs

**अनवस्थितकार्यस्य न जने न वने सुखम्।**
**जने दहति संसर्गो वने सङ्गविवर्जनम्** ॥२८१॥ - चाणक्यनीतिदर्पण अ. १३ श्लो. १५/१४

अनवस्थितकार्यस्य (मनुष्यस्य) सुखम् न जने (भवति) न वने (भवति)। (तस्य) जने संसर्गः दहति, (तथा) वने सङ्गविवर्जनम् (दहति) ॥

The happiness of a person with haphazard habits is neither among his people nor in the forest. Amongst the people, his contacts torture him and in the forest, their absence afflicts him.

अनवस्थितकार्यस्य- in पु. लिं. ष. वि. ए. व. of अनवस्थितकार्यः- one with disorganised work habit, poor work management- अनवस्थित- disorganised, unsteady nature- क. भू. धा. वि. of अन्+ अव+ स्था- (स्था- तिष्ठति १ ग. प. प. to stay, stand), कार्यम्- work, thing that ought to be done- कार्य (also करणीय, कर्तव्य & कृत्य,)- क. वि. धा. सा. वि. of कृ- करोति कुरुते ८ ग. उ. प. to do)- अनवस्थितम् कार्यम् यस्य सः- बहुव्रीहि स., जने & वने- both in स. वि. ए. व. of जनः- पु. लिं.- people, society & वनम्- न. लिं.- forest, wilderness, संसर्गः- association, contact, co-existence, intimate relation- in पु. लिं. प्र. वि. ए. व., सङ्गविवर्जनम्- absence of a company, association- सङ्गः- company, association, विवर्जनम्- abandoning, leaving, exclusion- (वि+ वृज्- १ ग. प. प. to shun, avoid, deprive of)- सङ्गस्य विवर्जनम्- ष. तत्पुरुष स.- in न. लिं. प्र. वि. ए. व., दहति- वर्त. प्र. पु. ए. व. of दह्- to burn, scorch, afflict, destroy, consume, सुखम्- satisfaction, happiness, joy- here used as adverb, न-no, not- अव्यय

**एकाक्षरप्रदातारं यो गुरुं नाभिविन्दति ।**
**श्वानयोनिशतं गत्वा चाण्डालेष्वभिजायते** ॥२८२॥ - चाणक्यनीतिदर्पण अ. १३ श्लो. १८
पा.भे.: नाभिविन्दति/नाभिवन्दते, गत्वा/भुक्त्वा

**एकाक्षरप्रदातारं यो गुरुं नाभिनन्दति।**
**तस्य श्रुतं तपो ज्ञानं स्रवत्यामघटाम्बुवत्** ॥-शाट्यायनीयोपनिषद्- ३९

यो एकाक्षरप्रदातारं गुरुं नाभिविन्दति, सः श्वानयोनिशतं गत्वा चाण्डालेष्वभिजायते ॥

A person, who does not respect his teacher, who has taught him even a single syllable, will suffer a hundred births of a dog and then be born as a cruel man.

यो एकाक्षरप्रदातारं गुरुं नाभिविन्दति, तस्य श्रुतं तपो ज्ञानं आमघटाम्बुवत् स्रवति॥

A person's penance, education and knowledge leaks out like water from a soft pot who does not respect his teacher, who has taught him even a single syllable.

एकाक्षरप्रदातारम् & गुरुम्- both in पु. लिं. द्वि. वि. ए. व. of एकाक्षरप्रदातृ- giver of a single syllable/letter- एक- adjctv- one, single, अक्षरम्- letter, syllable, alphabet, प्रदातृ- giver, donor- एकम् अक्षरम्- एकाक्षरम्- वि. पू. प. कर्मधारय स. & एकाक्षरस्य प्रदाता- ष. तत्पुरुष स. & गुरुः- teacher, preceptor, elder, father, यः (यद्)- who- in पु. लिं. प्र. वि. ए. व., श्वानयोनिशतम्- in न. लिं. द्वि. वि. ए. व.- a hundred births of a dog- श्वानः- a dog, योनिः- पु/स्त्री. लिं- womb, uterus, any place of birth or origin, शतम्- a hundred- श्वानस्य योनिः- श्वानयोनिः & श्वानयोनीनाम् शतम्- both ष. तत्पुरुष स., गत्वा/भुक्त्वा- both पू. का. वा. धा. सा. त्वान्त अव्यय of गम्- गच्छति १ ग. प. प. to go, enter & भुज्- भुनक्ति- भुंक्ते ७ ग. उ. प. to eat, enjoy, suffer, चाण्डालेषु- in पु. लिं. स. वि. ब. व. of चाण्डालः- a member of a outcast, a man of cruel or wicked deeds, अभिविन्दति/ अभिवन्दते, अभिजायते- all in वर्त. प्र. पु. ए. व. of अभि+ विद्- to respect, - (विद्- विन्दति ते ६ ग. उ. प. to recognise, gain, experience), अभि+ वन्द्- वन्दते १ ग. आ. प. to salute, greet respectfully, adore & अभि+ जन्- to be reborn, to arise, to spring from- जन्- जायते- ४ ग. आ. प. to be born, produced), न-no, not, अव्यय आम- soft, श्रुतं - heard, learned -स्रवति- वर्त. प्र. पु. ए. व of स्रु- to drip, flow

**उत्पन्नपश्चात्तापस्य बुध्दिर्भवति यादृशी ।**
**तादृशी यदि पूर्वं स्यात्कस्य स्यान्न महोदयः** ॥२८३॥ - चाणक्यनीतिदर्पण अ. १४ श्लो. ७

उत्पन्नपश्चात्तापस्य (मनुष्यस्य) यादृशी बुध्दिः भवति, तादृशी (बुध्दिः), यदि पूर्वम् (एव) स्यात्, कस्य न महोदयः स्यात्?

If the kind realisation that one develops post-repentance (after doing bad deeds), was there with him beforehand, who would experience great prosperity?

उत्पन्नपश्चात्तापस्य & कस्य- both in पु. लिं. ष. वि. ए. व. of उत्पन्नपश्चात्तापः- one who has developed sense of repentance- उत्पन्न- adjctv- developed, generated, produced- क. भू. धा. वि. of उद्+ पद्- (पद्- पद्यते ४ ग. आ. प. to go, to approach), पश्चात्तापः- repentance- पश्चात्- अव्यय- afterwards, subsequently, तापः- pain, torment affliction- पश्चात् कृतः तापः- मध्यम प. लोपी कर्मधारय स. & उत्पन्नः पश्चात्तापः- वि. पू. प. कर्मधारय स. & कः (किम्)- who, भवति- वर्त. प्र. पु. ए. व. of भू- १ ग. प. प. to be, to exist, महोदयः- great prosperity, rise- महत्- adjctv- great, high, big & उदयः- rise, uplifting- महान् उदयः- वि. पू. प. कर्मधारय स.- in पु. लिं. प्र. वि. ए. व., स्यात्- विध्यर्थ प्र. पु. ए. व. of अस्- अस्ति २ ग. प. प. to be, to exist, यादृशी (यादृश्- adjctv)- of which kind, of which type, तादृशी (तादृश्- adjctv)- of that kind, of that type, बुध्दिः- mind, thinking, understanding- all in स्त्री. लिं. प्र. वि. ए. व., यदि- if, in which case, पूर्वम्- before, at first, beforehand & न- no, not- all अव्ययs

**यस्य चाप्रियमिच्छेत्तु तस्य ब्रूयात्सदा प्रियम् ।**
**व्याधो मृगवधं कर्तुं गीतं गायति सुस्वरम्** ॥२८४॥ - चाणक्यनीतिदर्पण अ. १४ श्लो. १०

*This verse is decietful!*

(यथा) व्याधः मृगवधम् कर्तुम् सुस्वरम् गीतम् गायति, (तथा मनुष्यः), यस्य अप्रियम् च इच्छेत् तु, तस्य सदा प्रियम् ब्रूयात्॥

One should talk pleasantly with someone he wants to hurt. A hunter, wanting to kill a deer, plays melodious tunes (for attracting them).

यस्य- whose & तस्य- his- both in पु.लिं. ष. वि. ए. व. of यद्- who & तद्- he, प्रियम्- adjctv- pleasant, agreeable- न प्रियम्- अप्रियम्- harsh, hurtful- नञ् तत्पुरुष स., गीतम्- song (गीत- क. भू. धा. वि. of गै- गायति १ ग. प. प. to sing), सुस्वरम्- melodious tune- सु- अव्यय- good, स्वरम्- tune, sound, noise- सुभगम् स्वरम्- प्रादि कर्मधारय स., मृगवधम्- killing of an animal- मृगः- an animal, deer, वधः- killing, murder (वध्- वधति १ ग. प. प. to kill, slay)- मृगस्य वधः- ष. तत्पुरुष स.- all in पु/न. लिं. द्वि. वि. ए. व., इच्छेत् & ब्रूयात्- both विध्यर्थ प्र. पु. ए. व. of इष्- इच्छति ६ ग. प. प. to desire, want, wish for & ब्रू- ब्रवीति ब्रूते २ ग. उ. प. to say, talk, व्याधः- hunter- in पु. लिं. प्र. वि. ए. व., कर्तुम्- पू. का. वा. धा. सा. तुमन्त-हेत्वर्थक अव्यय of कृ-करोति कुरुते ८ ग. उ. प. to do, गायति- वर्त. प्र. पु. ए. व. of गै- see above, च-and, तु- if, but, on the other hand, even then, सदा- always, daily- all अव्ययs

**अग्निरापः स्त्रियो मूर्खाः सर्पा राजकुलानि च।**
**नित्यं यत्नेन सेव्यानि सद्यः प्राणहराणि षट्** ॥२८५॥ - चाणक्यनीतिदर्पण अ. १४, श्लो. १२

अग्निः, आपः, स्त्रियः, मूर्खाः, सर्पाः, राजकुलानि च नित्यम् यत्नेन सेव्यानि (भवन्ति)। (ते) सद्यः प्राणहराणि षट् (सन्ति) ।

One should always handle with utmost care, fire, water, women, stupid people, snakes and members of the royal households. These six can take your life away.

*Chanakya may be talking about women who lure men into doing bad things. Same could be said about men who lure women into doing inappropriate things.*

अग्निः- fire- in पु. लिं. प्र. वि. ए. व., आपः (आपस्)- water- in न. लिं. प्र. वि. ए. व., स्त्रियः- in स्त्री. लिं. प्र. वि. ब. व. of स्त्री- a woman, मूर्खाः & सर्पाः- both in पु. लिं. प्र. वि. ब. व. of मूर्खः- a stupid or foolish person & सर्पः- a snake, serpent, राजकुलानि, सेव्यानि, प्राणहराणि & षट्- all in न. लिं. प्र. वि. ब. व. of राजकुलम्- a royal family, a king's household- राजन्- a King, कुलम्- family, race- राज्ञः कुलम्- ष. तत्पुरुष स., सेव्यम्- one, that to be served, attended to- सेव्य (also सेवितव्य & सेवनीय)- क. वि. धा. सा. वि. of सेव्- सेवते १ ग. आ. प. to serve, attend to, wait upon, प्राणहरम्- deadly, very dangerous- प्राणः- the breath of life, life- प्राणान् हरति इति- प्राणहरम्- उपपद तत्पुरुष स. & षष्- six,  यत्नेन- पु/न. लिं. तृ. वि. ए. व. of यत्न- effort, exertion, diligence, care- (यत्- यतते १ ग. आ. प. to attempt, strive), च-and, नित्यम्- always, सद्यः (सद्यस्)- instantly, forthwith, immediately, suddenly- all अव्ययs

**स जीवति गुणा यस्य यस्य धर्मः स जीवति ।**
**गुणधर्मविहीनस्य जीवितं निष्प्रयोजनम्** ॥२८६॥ - चाणक्यनीतिदर्पण अ. १४, श्लो. १३

यस्य गुणाः (सन्ति), सः जीवति, (तथा) यस्य धर्मः (अस्ति) सः जीवति। गुणधर्मविहीनस्य जीवितम् निष्प्रयोजनम् (अस्ति) ॥

A person with good qualities lives (a good life). One, who follows 'Dharma', lives (a real good life.) The life of a person devoid of any virtue or Dharma, serves no purpose (is useless).

गुणाः- in पु. लिं. प्र. वि. ब. व. of गुणः- virtue, quality, good habit, सः (तद्)- he & धर्मः- prescribed codes of conduct- 'Dharma'- both in पु. लिं. प्र. वि. ए. व., यस्य- whose & गुणधर्मविहीनस्य- in पु. लिं. ष. वि. ए. व. of यद्- who & गुणधर्मविहीनः- one who is devoid of any virtue and Dharma- prescribed codes of conduct- गुणः च धर्मः च- गुणधर्मौ- द्वन्द्व स. विहीनः- devoid of, absence of- विहीन- क. भू. धा. वि. of वि+ हा- totally devoid of- (हा- जहाति २ ग. प. प. to leave, abandon)- गुणधर्माभ्याम् विहीनः- तृ. तत्पुरुष स., जीवति- वर्त. प्र. पु. ए. व. of जीव्- १ ग. प. प. to live, to be alive, जीवितम्- life, survival- जीवित- क. भू. धा. वि. of जीव्- १ ग. प. प. to live & निष्प्रयोजनम्- useless, causeless, of no purpose- both in न. लिं. प्र. वि. ए. व.

**तावन्मौनेन नीयन्ते कोकिलैश्चैव वासराः ।**
**यावत्सर्वजनानन्ददायिनी वाक् प्रवर्तते**॥२८७॥ - चाणक्यनीतिदर्पण अ. १४, श्लो. १८

तावत् कोकिलैः मौनेन च एव वासराः नीयन्ते, यावत् (तेषाम्) सर्वजनानन्ददायिनी वाक् प्रवर्तते॥

The Koyals (Cuckoos) pass their days in total silence (quietly), until their melodious voice providing joy to everyone developed (evolves).

सर्वजनानन्ददायिनी- one that is providing happiness /joy to everyone- सर्व- pronominal adjctv- all, entire, whole, जनः- person, people, आनन्दः- happiness/joy, दायिनी (दायिन्)- provider, giver, granting- सर्वः जनः- सर्वजनः- वि. पू. प. कर्मधारय स., सर्वजनानाम् आनन्दः- सर्वजनानन्दः- ष. तत्पुरुष स. & सर्वजनानन्दस्य दायिनी - ष. तत्पुरुष स .& वाक् (वाच्)- an assertion, an assurance, a promise- both in स्त्री. लि. प्र. वि. ए. व., प्रवर्तते- वर्त. प्र. पु. ए. व. of प्र+ वृत्- to commence, happen, to take place, to develop, to appear- (वृत्- वर्तते- १ ग. आ. प. to be, to exist, remain, कोकिलैः- in पु. लि. तृ. वि. ब. व. of कोकिलः- cuckoo bird- Koyal, मौनेन- in न. लि. तृ. वि. ए. व. of मौनम्- silence, वासराः- in पु. लि. प्र. वि. ब. व. of वासरः- a day, नीयन्ते- कर्मणि प्रयोग वर्त. प्र. पु. ब. व. of नी- नयति-ते १ ग. उ. प. to lead, carry, conduct, to pass (time), च-and, एव- just, merely, only, यावत्- till which time, until & तावत्- till that time, so far, as long as- all अव्ययs

**एक एव पदार्थस्तु त्रिधा भवति वीक्षितः ।**
**कुणपं कामिनी मांसं योगिभिः कामिभिः श्वभिः**॥२८८॥ - चाणक्यनीतिदर्पण अ. १४, श्लो. १६

एकः एव पदार्थः तु (त्रिभिः) वीक्षितः त्रिधा भवति, (यथा स्त्रियः शरीरम् ) योगिभिः कुणपम् (इव), कामिभिः कामिनी (इव), (तथा) श्वभिः मांसम् (इव दृश्यते)॥

Just one single object, viewed by three different persons, is perceived in three different ways, such as (a beautiful woman)! For saints, she is to be avoided, by lustful people she is a lovely woman and by dogs only as an item of flesh.

एकः- single, one, पदार्थः- an item, a thing, an object & वीक्षितः- one, which is viewed, observed, glanced- वीक्षित- क. भू. धा. वि. of वि+ ईक्ष्- to behold, perceive- (ईक्ष्- ईक्षते १ ग. आ. प. to see, observe)- all in पु. लिं. प्र. वि. ए. व., भवति- वर्त. प्र. पु. ए. व. of भू- १ ग. प. प. to be, to become, to exist, योगिभिः, कामिभिः & श्वभिः- all in पु. लिं. तृ. वि. ब. व. of योगिन्- a saint, an ascetic, कामिन्- a lover, a lustful person & श्वन्- a dog, कुणपम्- न. लिं- a term often used as a word of contempt with living beings, a dead body, corpse, कामिनी- स्त्री. लिं.- a beloved, a lustful woman, मांसम्- न. लिं- a piece of meat, flesh- all in प्र. वि. ए. व., एव- only, just, merely, तु- but, on the other hand & त्रिधा- trebly, in three ways or parts- all अव्ययs

**त्यज दुर्जनसंसर्गं भज साधुसमागमम्।**
**कुरु पुण्यमहोरात्रं स्मर नित्यमनित्यताम्** ॥२८९॥ - चाणक्यनीतिदर्पण अ. १४ श्लो. २०

दुर्जनसंसर्गम् त्यज, साधुसमागमम् भज, अहोरात्रम् पुण्यम् कुरु (तथा) नित्यम् अनित्यताम् स्मर॥

Leave the company of wicked people. Associate yourself with the company of noble people. Strive to do meritorious deeds day and night. And always remember the temporaray nature (of everything).

त्यज, भज, कुरु & स्मर- all आज्ञार्थ म. पु. ए. व. of त्यज्- त्यजति १ ग. प. प. to leave, abandon, quit, भज्- भजति- ते १ ग. उ. प. to be attached or devoted to, to attend or serve, कृ- करोति कुरुते ८ ग उ. प. to do, make, strive for & स्मृ- स्मरति १ ग. प. प. to remember, keep in mind, be aware of, दुर्जनसंसर्गम्- a company of wicked people- दुष्ट- spoiled, wicked, bad- क. भू. धा. वि. of दुष्- दुष्यति ४ ग. प. प. to be bad, wicked, जनः- person, people, संसर्ग- contact, company, association- दुष्टः जनः- दुर्जनः- प्रादि कर्मधारय स. & दुर्जनस्य संसर्गः- दुर्जनसंसर्गः- पु. लिं.- ष. तत्पुरुष स., साधुसमागमम्- association of noble people- साधुः- noble, saintly person, meeting, contact- साधोः समागमः- साधुसमागमः- पु. लिं., पुण्यम्- meritorious/good deed - न. लिं. & अनित्यताम्- uncertainty, fickleness, doubtfulness- नित्य- adjctv- perpetual, ever lasting- ता- suffix implies: quality, nature- न नित्यता- अनित्यता- स्त्री. लिं- नञ् तत्पुरुष स.- all in द्वि. वि. ए. व., अहोरात्रम्- day and night (अहन्- न.लिं- a day, day time & रात्रिः/रात्री- स्त्री. लिं.- a night- अहनि च रात्रौ च- अहोरात्रम्- द्वंद्व स.) & नित्यम्- daily, constantly, always- both अव्ययs

**अयुक्तं स्वामिनो युक्तं युक्तं नीचस्य दूषणम्।**
**अमृतं राहवे मृत्युर्विषं रुद्रस्य भूषणम्**॥२९०॥ - चाणक्यनीतिदर्पण अ. १५ श्लो. ७

स्वामिनः अयुक्तम् युक्तम् (भवति, परन्तु) नीचस्य युक्तम् (अपि) दूषणम् (भवति, यथा), राहवे अमृतम् मृत्युः (भवति, परन्तु) रुद्रस्य विषम् भूषणम् (अस्ति) ॥

For a powerful person, a harmful thing is proper but for a low person, even a right thing is impoper! The nectar of immortality caused death for the demon Rahu, while the poison is an ornament of Lord Shiva.

स्वामिनः, नीचस्य, राहवे & रुद्रस्य- all in पु. लिं. ष. वि. ए. व. of स्वामिन्- a master, powerful person, proprietor, King, नीचः- a lowly, mean, worthless person, राहुः- name of a demon who is supposed to have lost is body when got detected in his disguise during distribution of Amrut, the nectar of

immortality & रुद्रः- a name of Shiva, युक्तम्- proper, fit, useful, worthy, suitable, good & न युक्तम्- अयुक्तम्- useless, improper, bad, harmful- (युक्त- क. भू. धा. वि. of युज्- युनक्ति युंक्ते ७ ग. उ. प. to deploy, use, harness, join), दूषणम्- a cause of censure, blame, fault- ( दुष्- दुष्यति ४ ग. प. प. to be bad, corrupted, अमृतम्- nectar of immortality- (मृत- dead, ruined- क. भू. धा. वि. of मृ- म्रियते ६ ग. आ. प. to die- न मृत- अमृत- immortal), विषम्- poison, venom, भूषणम्- an ornament, an item of decoration, मृत्युः- death, ruin

**तद्भोजनं यद् द्विजभुक्तशेषं तत्सौहृदं यत्क्रियते परस्मिन्।**
**सा प्राज्ञता या न करोति पापं दम्भं विना यः क्रियते स धर्मः**॥२९१॥ - चाणक्यनीतिदर्पण अ. १५ श्लो. ८

भोजनम् तद्, यद् द्विजभुक्तशेषम् (भवति), सौहृदम् तद् यद् परस्मिन् क्रियते, प्राज्ञता सा या पापम् न करोति, धर्मः सः यः विना दम्भम् क्रियते॥

Only that remaining meal is the real meal which is eaten after feeding the invited (educated or members of upper classes). Real affection is the one that is showered on an outsider / a stranger. Real intelligence is that one, which does not commit any sin. Real Dharma (way of life) is that one, which is practiced without any arrogance.

भोजनम्- food, meal, eating, तद्- that, यद्- which, द्विजभुक्तशेषम्- remaining food after feeding the द्विजः- twice-born- a member of upper three classes after thread ceremony and 12 years of studies, a scholar well versed in scriptures- (द्विवारं जन्म यस्य सः- द्विजः- बहुव्रीहि स.), भुक्त- eaten, enjoyed- क. भू. धा. वि. of भुज्- भुनक्ति भुंक्ते ७ ग. उ. प. to eat, enjoy, शेषम्- remainder, anything leftout- (शिष्- शेषति १ ग. प. प. to spare, leave as remainder)- द्विजेन भुक्तम्- द्विजभुक्तम्- तृ. तत्पुरुष स. & द्विजभुक्तस्य शेषम् - द्विजभुक्तशेषम्- ष. तत्पुरुष स. & सौहृदम्- friendship, affection- all in न. लिं. प्र. वि. ए. व., परस्मिन्- in पु. लिं. स. वि. ए. व. of परः- outsider, stranger, other, क्रियते- कर्मणि प्रयोग प्र. पु. ए. व. of कृ & करोति- वर्त. प्र. पु. ए. व. of कृ- करोति कुरुते ८ ग. उ. प. to do, make, प्राज्ञता- wisdom, intelligence, understanding- (प्राज्ञ- adjctv- intellectual, wise- ता suffix implies quality), सा (तद्)- that, she & या- which- all in स्त्री. लिं. प्र. वि. ए. व., पापम्- sin, bad or wrong deed & दम्भम्- deceit, fraud, hypocrisy, arrogance- in न. लिं. द्वि. वि. ए. व., धर्मः- prescribed codes of conduct- Dharma, chosen way of life, सः (तद्)- that, he & यः (यद्)- who- in पु. लिं. प्र. वि. ए. व., न- no, not, विना- without, absence of- both अव्ययs

**मणिर्लुठति पादाग्रे काचः शिरसि धार्यते।**
**क्रयविक्रयवेलायां काचः काचो मणिर्मणिः**॥२९२॥ - चाणक्यनीतिदर्पण अ. १५ श्लो. ९

(कदाचित्) मणिः पादाग्रे लुठति (तथा) काचः शिरसि धार्यते, (परन्तु, तेषाम्) क्रय- विक्रय-वेलायाम् काचः काचः (एव मूल्यमाप्नोति तथा) मणिः मणि: (एव मूल्यमाप्नोति)॥

A jewel (in an anklet- नूपुर) may sometimes move about over the feet while a glass-bead may find it place on the head. But at the time of buying and selling of these items, a jewel gets valued as a jewel and a glass bead gets value of a glass bead.

मणिः- a gem, jewel, precious stone & काचः- glass beed- both in पु. लि. प्र. वि. ए. व., लुठति- वर्त. प्र. पु. ए. व. of लुठ्- ६ ग. प. प. to roll about, move to and fro, पादाग्रे- adverb- in front of the feet, over the feet- पादः- foot, अग्रे- an adverb- in front of, before- पादस्य अग्रे- ष. तत्पुरुष स., शिरसि- in न. लि. स. वि. ए. व. of शिरस्- head, top, धार्यते- कर्मणि प्रयोग प्र. पु. ए. व. of धृ- धरति १ ग. प. प. to bear, hold, carry, क्रयविक्रयवेलायाम्- in स्त्री. लि. स. वि. ए. व. क्रयविक्रयवेला- occasion of buying and selling, trading- क्रयः- buying, purchasing, विक्रयः- sale, selling, वेला-स्त्री. लिं- time, season, occasion- क्रयः च विक्रयः च- क्रयविक्रयौ- trade, buying and selling- क्रयविक्रयोः वेला- ष. तत्पुरुष स.

**धन्या द्विजमयी नौका विपरीता भवार्णवे ।**
**तरन्त्यधोगताः सर्वे उपरिस्थाः पतन्त्यधः** ॥२९३॥ - चाणक्यनीतिदर्पण अ. १५ श्लो. १३

(एता) द्विजमयी नौका धन्या (अस्ति)। (सा) भवार्णवे विपरीता (भवति)। (यतः तस्याः) अधोगताः सर्वे तरन्ति (किन्तु तस्याः) उपरिस्थाः अधः पतन्ति ।

This ship, full of educated people, is very blessed! It floats contrary in this ocean of worldly life. Those who stay under her cross the ocean safely, while those who stay over her sink down!

द्विजमयी- one formed by educated members- द्विजः- twice-born- word used for students who have undergone various studies under a teacher- (द्विवारं जन्म यस्य सः- द्विजः- बहुव्रीहि स.), मय/मयी- adjctv- an affix used to indicate 'made of', 'consisting or composed of', 'full of', नौका- boat, ship, धन्या- blessed or fortunate one, lucky, विपरीता- adverse, acting in opposite way, contrary manner- विपरीत- क. भू. धा. वि. of वि+ परि+ इ- to act in contrary way- (इ- एति २ ग. प. प. to go, to reach)- all in स्त्री. लिं. प्र. वि. ए. व., भवार्णवे- in पु. लिं. स. वि. ए. व of भवार्णवः- the ocean of worldly life- भवः- worldly life, worldly existence, अर्णवः- ocean, sea- भवः अर्णवः इव- उ. उ. प. कर्मधारय स., तरन्ति & पतन्ति- वर्त. प्र. पु. ब. व. of तॄ- तरति १ ग. प. प. to cross over, float, to go to the end of & पत्- पतति १ ग. प. प. to fall, fall down, अधोगताः, सर्वे & उपरिस्थाः- all in पु. लिं. प्र. वि. ब. व. of अधोगतः- one who has gone down/ below- अधः (अधस्)- अव्यय- below, down, गतः- gone, being in, situated in- गत- क. भू. धा. वि. of गम्- गच्छति १ ग. प. to go, to move in- अधः गतः , सर्वः- all, everyone & उपरिस्थः- one who has stayed on the top- उपरि- अव्यय- above, over, upon- उपरि तिष्ठति इति - उपरिस्थः- उपपद तत्पु स

**उर्व्यां कोऽपि महीधरो लघुतरो दोर्भ्यां धृतो लीलया**
**तेन त्वं दिवि भूतले च सततं गोवर्धनो गीयसे ।**
**त्वां त्रैलोक्यधरं वहामि कुचयोरग्रे न तद्गण्यते**
**किं वा केशव भाषणेन बहुना पुण्यैर्यशो लभ्यते** ॥२९४॥ - चाणक्यनीतिदर्पण अ. १५ श्लो. १९
पा. भे.: लघुतरो दोर्भ्यां = लघुतरोङ्गुल्या

(त्वया), उर्व्याम् कः अपि लघुतरः महीधरः अङ्गुल्या /दोर्भ्याम् लीलया धृतः, तेन त्वम् दिवि भूतले च सततम् गोवर्धनः गीयसे। (परन्तु अहम्) त्वाम् त्रैलोक्यधरम् कुचयोः अग्रे वहामि तद् न गण्यते। केशव, किम् बहुना भाषणेन वा, यशः पुण्यैः लभ्यते॥

*A Gopi is complaining that she is not getting any credit for holding the three world lifter Krishna in her heart.*

Oh, Keshava, you once easily held some small mountain on this earth by your finger. For that act you are always praised as Govardhan-dhari on earth and heaven. I hold you, the holder of all three worlds, over my breasts. But that does not get counted at all! Why say more? Is glory attained only by fate?

उर्व्याम् & दिवि- in स्त्री. लिं. स. वि. ए. व. of उर्वी- the earth, land& दिव्- heaven, sky, भूतले- in पु/न. लिं. स. वि. ए. व. of भूतलः/लम्- the surface of the earth- भूः- earth, universe, तलः/लम्- surface, base- भुवः तलः- ष. तत्पुरुष स., कः (किम्)- who, कः अपि- someone, लघुतरः- smaller size- लघु- adjctv- small, light, little, तर- suffix implies comparative degree, महीधरः- a mountain- मही- स्त्री. लिं.- earth, land, धरः- holder, bearer- महीम् धरति इति- उपपद तत्पुरुष स., गोवर्धनः- a celebrated hill in Vrindavan (वृन्दावन) in Mathura- (गो- cow/bull, cattle- गोः वर्धनः- गोवर्धनः- षष्ठी तत्पुरुष स. & गोवर्धनम् धारयति इति- गोवर्धनधारिन्- उपपद तत्पुरुष स. an epithet of Krishna) & धृतः- borne, held- धृत- क. भू. धा. वि. of धृ- धरति, धारयति- ते १ प. प. & १० उ. प. to hold, bear- all in पु. लिं. प्र. वि. ए. व., अङ्गुल्या & लीलया- both in स्त्री. लिं. तृ. वि. ए. व. of अङ्गुली- a finger & लीला- pastime, mere sport, child's play, दोर्भ्याम्- in पु/न. लिं. तृ. वि. द्वि. व. of दोस्- the forearm, arm, तेन & भाषणेन- in पु/न. लिं. तृ. वि. ए. व. of तद्- it, he, that & भाषणम्- saying, speech, talk, words, त्वम्- you & त्वाम्- to you- प्र. वि & द्वि. वि. ए. व. of युष्मद्- you, त्रैलोक्यधरम्- in पु. लि. द्वि. वि. ए. व. of त्रैलोक्यधरः- sustainer/ bearer of the three worlds- त्रि- three, लोकः/लोकम्- world- त्रैलोक्यम्- त्रयाणाम् लोकानाम् समाहारः- न. लिं. ए. व. द्विगु स.- the three worlds taken collectively- त्रैलोक्यम् धारयति इति- उपपद तत्पुरुष स., कुचयोः- in पु. लि. ष. वि. द्वि. व. of कुचः- the female breast, अग्रे- adverb- in front, before, on top, तद्- that, it & यशः (यशस्)- fame, glory, renown- both in न. लिं. प्र. वि. ए. व., केशव- an epithet of Vishnu- in पु. लिं. सं. वि. ए. व., पुण्यैः- in न. लिं. तृ. वि. ब. व. of पुण्यम्- virtue, meritorious deed, गीयसे- कर्मणि प्रयोग वर्त. म. पु. ए. व. of गै- गायति १ ग. प. प. to sing, relate, declare, गण्यते & लभ्यते- both कर्मणि प्रयोग वर्त. प्र. पु. ए. व. of गण्- गणयति- ते १० ग. उ. प. to count, reckon, consider & लभ्- लभते १ ग. आ. प. to get, acquire, obtain, वहामि- वर्त. उ. पु. ए. व. of वह्- वहति- ते १ ग. उ. प. to carry, bear, sustain, अपि- also, even, न- no, not, वा- as an alternative connection it means- 'or', च- and, सततम्- always, constantly, daily, किम् बहुना- -why say much, in short- all अव्ययs

**न ध्यातं पदमीश्वरस्य विधिवत्संसारविच्छित्तये**
**स्वर्गद्वारकपाटपाटनपटुर्धर्मोऽपि नोपार्जितः।**
**नारीपीनपयोधरोरुयुगलं स्वप्नेऽपि नालिङ्गितं**
**मातुः केवलमेव यौवनवनच्छेदे कुठारा वयम्** ॥२९५॥ - चाणक्यनीतिदर्पण अ. १६ श्लो. १

(मया) संसार-विच्छित्तये ईश्वरस्य पदम् विधिवत् न ध्यातम्, (मया) स्वर्ग-द्वार-कपाट-पाटन-पटुः धर्मः अपि न उपार्जितः, (मया) स्वप्ने अपि नारी- पीन-पयोधर-ऊरु-युगलम् न आलिङ्गितम्, वयम् मातुः यौवन-वन-च्छेदे कुठाराः एव केवलम् (अभूम)॥

I did not meditate upon feet the Lord in a proper manner that would have enabled me to get free from the bonds of this worldly life, nor did I earn the means of breaking open shutters of the doors of the heaven by following my Dharma (prescribed codes of conduct). I did not also embrace pairs of the fleshy plump breasts and thighs of a woman even in my dreams! Alas, we served just merely as axes for cutting down the garden of youthful days of our mother.

ध्यातम्- meditated upon, thought of- ध्यात- क. भू. धा. वि. of ध्यै- ध्यायति १ ग. प. प. to think of, meditate, पदम्- position, foot, matter, विधिवत्- in a proper manner- विधिः- पु. लिं- method, practice, manner & वत् suffix implies quality, nature, नारीपीनपयोधरोरुयुगलम्- pairs of plumpy breasts and thighs of a woman- नारी- woman, पीन- adjctv- plump, large, पयोधरः- female breast, cloud- पयस्- न. लिं- milk, water, धरः- holder- पयः धरति इति- उपपद तत्पुरुष स., ऊरुः- thigh, युगलम्- a pair, couple- पयोधरः च ऊरुः च- पयोधरोरुः द्वंद्व स., पयोधरोरुः & पयोधरोर्वोः युगलम्- पयोधरोरुयुगलम्- ष. तत्पुरुष स., पीनम् पयोधरोरुयुगलम्- पीनपयोधरोरुयुगलम्- वि. पू. प. कर्मधारय स. & नार्याः पीनपयोधरोरुयुगलम्- ष. तत्पुरुष स., आलिङ्गितम्- embraced, clasped- आलिङ्गित- क. भू. धा. वि. of आ+ लिङ्ग्- to embrace, clasp- (लिङ्ग्- लिङ्गति १ ग. प. प. to go, move)- all in न. लिं. द्वि. वि. ए. व., ईश्वरस्य- in पु. लिं. ष. वि. ए. व. ईश्वरः- God, Master, संसारविच्छित्तये- स्त्री. लिं. च. वि. ए. व. of संसारविच्छित्तिः- breaking away from the bonds of worldly life- संसारः- family life, worldly affairs, विच्छित्तिः- cutting off, breaking away, cessation- संसारात् विच्छित्तिः- पं तत्पुरुष स., स्वर्गद्वारकपाटपाटनपटुः- proficient in opening the shutters of the doors of heaven- स्वर्ग- heaven, द्वारम्- door, gateway, कपाट- panel of a door, पाटन- breaking, cleaving, पटुः- an expert, proficient- स्वर्गस्य द्वारस्य कपाटस्य पाटनम्- स्वर्गद्वारकपाटपाटनम्- composite ष. तत्पुरुष स. & स्वर्गद्वारकपाटपाटने पटुः- स. तत्पुरुष स., धर्मः- prescribed codes of conduct- Dharma & उपार्जितः- earned, acquired- उपार्जित- क. भू. धा. वि. of उप+ अर्ज्- १ ग. प. प. to procure, obtain- all in पु. लिं. प्र. वि. ए. व., मातुः- in स्त्री. लिं. ष. वि. ए. व. of मातृ- mother, यौवनवनच्छेदे & स्वप्ने- स. वि. ए. व. of यौवनवनच्छेद- यौवनम्- youth, youthful days, वनम्- cluster of trees, a fountain, छेदः- cutting, felling down- वनम् इव यौवनम्- यौवनवनम्- उ. उ. प. कर्मधारय स. & यौवनवनस्य छेदः- ष. तत्पुरुष स. & स्वप्नः- dream, sleeping, कुठाराः & वयम्- both पु. लि. प्र. वि. ब. व. of कुठारः- an axe & अस्मद्- I, we, न- no, not, अपि- even, also, केवलम्- just, mere, एव- only, just- all अव्ययs

**यो मोहान्मन्यते मूढो रक्तेयं मयि कामिनी ।**
**स तस्या वशगो भूत्वा नृत्येत् क्रीडाशकुन्तवत्** ॥२९६॥ -चाणक्यनीतिदर्पण अ.१६ श्लो.३

यः मूढः मोहात् मन्यते इयम् कामिनी मयि रक्ता (अस्ति), सः तस्याः वशगः भूत्वा क्रीडा-शकुन्तवत् नृत्येत् ॥

A stupid person, under infatuation thinks that "this loveable woman is attracted to me", (soon) comes under her influence and starts dancing to her tunes like a toy-bird.

यः (यद्)- whichever, मूढः- stupid or foolish person- मूढ- क. भू. धा. वि. of मुह् -मुह्यति ४ ग. प. प. to be perplexed, to be stupid, foolish, सः (तद्)- he & वशगः- one, who is under control, influence- वशम्- control, influence- वशे गच्छति इति- उपपद तत्पुरुष स.- all in पु. लि. प्र. वि. ए. व., मोहात्- in पु. लि. पं. वि. ए. व. of मोहः- delusion, confusion, infatuation, affliction, मन्यते- वर्त. प्र. पु. ए. व. of मन्- ४ ग. आ. प. to think, consider, believe, इयम् (इदम्)- this, she, कामिनी- lustful, beloved, desirous woman- रक्ता- one having attachment- रक्त- क. भू. धा. वि. of रञ्ज्- रजति-ते- १ ग. उ. प. to be devoted, attached, enamoured- all in स्त्री. लि. प्र. वि. ए. व., मयि- in me- स. वि. ए. व. of अस्मद्- I, तस्याः- her- in स्त्री. लि. ष. वि. ए. व. of तद्- she, भूत्वा- पू. का. वा. त्वान्त धा. सा. अव्यय of भू- भवति १ ग. प. प. to become, to be, to exist, क्रीडाशकुन्तवत्- one like a toy-bird- क्रीडा- play, sport, शकुन्तः- bird, क्रीडायाः शकुन्तः- क्रीडाशकुन्तः- toy-bird- वत्- suffix implies quality, virtue, nature- in न. लि. प्र. वि. ए. व., नृत्येत्- विध्यर्थ प्र. पु. ए. व. of नृत्- नृत्यति४. ग. प. प. to dance, move about,

**न निर्मित: केन न दृष्टपूर्व: न श्रूयते हेममय: कुरङ्गः**
**तथापि तृष्णा रघुनन्दनस्य विनाशकाले विपरीत- बुद्धिः**॥२९७॥ -चाणक्यनीतिदर्पण अ.१६ श्लो.३

न श्रूयते हेममय: कुरङ्गः न निर्मित: केन, न दृष्टपूर्वः। तथा अपि, रघुनन्दनस्य तृष्णा (अभूत्)। विनाशकाले विपरीत-बुद्धिः (भवति)॥

No one had ever heard of a golden deer, nor was it ever created by anyone, nor was it ever seen before by anyone. Even then, the prince of Raghu dynasty, Rama, desired to get it. Alas, with a disaster impending, one's intellect works in an adverse manner.

हेममयः- one that is golden, made of gold- हेमन्- न. लिं.- gold, मय- adjctv- an affix used to imply 'made of', 'consisting of'., कुरङ्गः- deer, निर्मितः- produced, manufactured, created- निर्मित- क. भू. धा. वि. of निस्+ मा- to make, create- (मा- माति २ ग. प. प. to measure, limit), दृष्टपूर्वः- seen before- दृष्ट- adjctv- seen, perceived- दृश्- पश्यति १ ग. प. प. to see, perceive, पूर्व- adjctv- before, earlier, former, previous- पूर्वः दृष्टः - वि. उ. प. कर्मधारय स स.- all in पु. लिं. प्र. वि. ए. व., केन- by whom- in पु/न. लिं. तृ. वि. ए. व. of किम्- who, रघुनन्दनस्य- in पु. लिं. ष. वि. ए. व. of रघुनन्दनः- an epithet of Rama- रघुः- celebrated King of the solar-race, नन्दनः- a son, progeny- रघोः नन्दनः- ष. तत्पुरुष स., श्रूयते- getting heard- कर्मणि प्रयोग प्र. पु. ए. व. of श्रु- शृणोति ५ ग. प. प. to hear, listen विनाशकाले- in पु. लिं. स. वि. ए. व. of विनाशकालः- at the time of destruction, total failure- विनाशः- ruin, destruction, utter loss, कालः- time, period- विनाशस्य कालः- ष. तत्पुरुष स., विपरीतबुद्धिः- wrong understanding, acting in an opposite manner- विपरीत- adjctv- reversed, contrary, false, adverse, inverse- क. भू. धा. वि. of वि+परि+ इ- (इ- एति- २ ग. प. प. to go, to arrive at), बुद्धिः- स्त्री. लिं- thinking, perception, understanding, knowledge- विपरीता बुद्धिः- वि. पू. प. कर्मधारय स. & तृष्णा- thirst, desire, greed- (तृष्- तृष्यति ४ ग. प. प. to be thirsty, to wish)- both in स्त्री. लिं. प्र. वि. ए. व., न- no, not, तथा- like that, thus, अपि- also, even, तथा अपि- even then, despite of- all अव्ययs

**गुणाः सर्वत्र पूज्यन्ते न महत्योऽपि सम्पदः।**
**पूर्णेन्दुः किं तथा वन्द्यो निष्कलङ्को यथा कृशः** ॥२९८॥ -चाणक्यनीतिदर्पण अ.१६ श्लो.७

गुणा: सर्वत्र पूज्यन्ते, न महत्यः अपि सम्पद: (पूज्यन्ते)। निष्कलङ्कः कृशः (इन्दुः) यथा वन्द्यः (भवति), तथा किम् पूर्णेन्दुः (भवति)?

Good virtues are respected everywhere, not even the great wealth. Does the full-moon get the same respect as the weak but spotless moon?

*People all over adore the crecent moons.*

गुणाः-in पु. लि. प्र. वि. ब. व. of गुणः- virtue, quality, merit, पूज्यन्ते- कर्मणि प्रयोग वर्त. प्र. पु. ब. व. of पूज्- पूज्यते- getting worshipped, honoured- (पूज्- पूजयति-ते १० ग. उ. प. to worship, honour, adore), महत्यः & सम्पद:- both in स्त्री. लि. प्र. वि. ब. व. of महती (महत्)- adjctv- great, big, mighty & सम्पद्- wealth, riches, affluence, निष्कलङ्कः- adjctv- spotless, unblemished- निस्- अव्यय- prefix implies devoid of, without, कलङ्कः- stigma, , disrepute, a black spot- निर्गतः कलङ्कः यस्मात् सः- बहुव्रीहि स., कृशः- adjctv- lean, feeble, weak, emaciated, वन्द्यः- adjctv- adorable, venerable, laudable, to be respected, honoured- वन्द्य (also वन्दनीय & वन्दितव्य)- क. वि. धा. सा. वि. of वन्द्- वन्दते १ ग. आ. प. प. to

salute, greet respectfully, worship, पूर्णेन्दुः- the full moon- पूर्ण- adjctv- full, complete- क. भू. धा. वि. of पूर्- पूर्यते ४ ग. आ. प. to fill, complete, cover, satisfy- इन्दुः- the Moon- पूर्णः इन्दुः- वि. पू. प. कर्मधारय स.- all in पु. लि. प्र. वि. ए. व., सर्वत्र- everywhere, at all places, यथा- like which, as, तथा- thus, similar to, as, किम्- a particle of interrogation: whether, why, अपि- also, even, न-no, not- all अव्ययs

**संसारविषवृक्षस्य द्वे फले ह्यमृतोपमे।**
**सुभाषितं च सुस्वादु सङ्गतिः सुजने जने** ॥२९९॥ -चाणक्यनीतिदर्पण अ.१६ श्लो.१८

संसारविषवृक्षस्य सुस्वादु सुभाषितम्, सुजने जने सङ्गतिः च द्वे फले हि अमृतोपमे (स्तः) ॥
The poisonous tree of worldly life bears two fruits, comparable to the nectar of immortality. The first is a well-said pleasant witty quote and the second one is a company of good people.

संसारविषवृक्षस्य- in पु. लिं. ष. वि. ए. व. of संसारविषवृक्षः- course of mundane worldly life in the form of a poisonous tree- संसारः- worldly life, family, mundane existence, विषम्- poison, वृक्षः- tree- विषयुक्तः वृक्षः- विषवृक्षः- उ. प. लो. कर्मधारय स. & संसारः विषवृक्षः इव- संसारविषवृक्षः- उ. उ. प. कर्मधारय स., सुस्वादु- very sweet, pleasant- स्वादु- adjctv- sweet, pleasant tasteful- सुतराम् स्वादु - प्रादि कर्मधारय स. & सुभाषितम्- witty saying, well said quotes- भाषित- said, uttered, spoken- क. भू. धा. वि. of भाष्- भाषते १ ग. आ. प. to say, utter- सुभगम् भाषितम्- सुभाषितम्- प्रादि कर्मधारय स.- both in न. लिं. प्र. वि. ए. व., सङ्गतिः- contact, association, company- in स्त्री. लिं. प्र. वि. ए. व., जने & सुजने- both in न. लिं. स. वि. ए. व. जनः- people, person & सुजनः- noble, or virtuous people- सुभगः जनः- सुजनः- प्रादि कर्मधारय स., द्वे, फले & अमृतोपमे- all in न. लिं. प्र. वि. द्वि. व. of द्वि- two, फलम्- fruit, outcome, result & अमृतोपमम्- like that of ambrosia, nectar of immortality- अमृतम्- nectar of immortality, ambrosia- अमृतस्य उपमा- षष्ठी तत्पु स., हि- indeed, certainly, only & च-and- both अव्ययs

**अशक्तस्तु भवेत्साधुर्ब्रह्मचारी च निर्धनः।**
**व्याधिष्ठो देवभक्तश्च वृद्धा नारी पतिव्रता** ॥३००॥ -चाणक्यनीतिदर्पण अ.१७ श्लो.६

अशक्तः तु साधुः भवेत्, निर्धनः ब्रह्मचारी च (भवेत्),व्याधिष्ठः देवभक्तः च (भवेत्),(तथा) वृद्धा नारी पतिव्रता (भवेत्)॥

A weak person becomes virtuous. A poor man remains a bachelor. A sick person becomes a devotee of a God. An old woman gets devoted to her husband. *(An old man gets devoted to his wife).*

*This subhashit says realities of life for a person based on his/her weakness.*

अशक्तः- a weak person, incapable man- शक्तः- capable, competent- person- (शक्त- क. भू. धा. वि. of शक्- शक्नोति ५ ग. प. प. to be able)- न शक्तः- अशक्तः- नञ् तत्पुरुष स., साधुः- a sage, good virtuous man, pious person, निर्धनः- a poor person, one without wealth- धनम्- wealth, property- निर्गतम् धनम् यस्मात् सः- बहुव्रीहि स., ब्रह्मचारी (ब्रह्मचारिन्)- a person who follows spiritual practice in the first stage of life- ब्रह्मन्- न. लिं.- the Supreme being Vedas, sacred texts, celibacy, chastity- ब्रह्म चरति इति- ब्रह्मचारिन्- उपपद तत्पुरुष स., व्याधिष्ठः- a sick person, one suffering with ailment- व्याधिः- sickness, ailment- व्याधिना ग्रस्तः - व्याधिष्ठः- तृतीया तत्पुरुष स., देवभक्तः- a devotee of God- देवः- god, भक्तः- a devotee- (भक्त- क. भू. धा. वि. of भज्- भजति-ते १ ग. उ. प. to worship, attend upon, serve)-

देवस्य भक्तः- ष. तत्पुरुष स.- all in पु. लिं. प्र. वि. ए. व., वृद्धा- old, aged- वृद्ध- क. भू. धा. वि. of वृध्- वर्धते १ ग. आ. प. to grow, increase, age, नारी- woman, female, पतिव्रता- a devoted, faithful, loyal wife- पतिः- a husband, master, व्रतः/व्रतम्- a religious act, devotion, a vow- पतौ व्रता - सप्तमि तत्पुरुष स.- all in स्त्री. लिं. प्र. वि. ए. व., भवेत्- विध्यर्थ प्र. पु. ए. व. of भू-भवति १ ग. प. प. to be, to exist, to become, तु- but, on one hand, as to, and now, च-and- both अव्ययs

**नाऽन्नोदकसमं दानं न तिथिर्द्वादशी समा ।**
**न गायत्र्याः परो मन्त्रो न मातुः परं दैवतम् ॥**३०१॥ -चाणक्यनीतिदर्पण अ.१७ श्लो.७

अन्नोदकसमम् दानम् न (अस्ति), द्वादशी समा तिथिः न (अस्ति), गायत्र्याः परः मन्त्रः न (अस्ति), (तथा) मातुः परम् दैवतम् न (भवति)॥

There is no gift comparable to donation of food.There is no day holier than twelfth day of lunar fortnights. There is no hymn more sacred than the Gayatri Mantra. There is no divinity superior to one's own mother.

*Vishnu is the God and Vijayaa is Goddess of द्वादशी, It is considered auspicious in Hindu calendar. Not sure why it is most auspicious?*

अन्नोदकसमम्- one that is comparable to food and water- अन्नम्- food, उदकम्- water, सम- adjctv- same, identical, equal, like, similar to, comparable to- अन्नम् च उदकम् च- अन्नोदकम्- द्वंद्व स. & अन्नोदकस्य समम्- ष. तत्पुरुष स., दानम्- giving, granting, पर- adjctv- beyond, higher or superior to, greatest, दैवतम्- divinity, deity, god- all in न. लिं. प्र. वि. ए. व., तिथिः- a lunar day, द्वादशी- twelfth dat of a lunar fortnight, समा (सम- adjctv)- see above- द्वादश्याः समा- ष. तत्पुरुष स.- all in स्त्री. लिं. प्र. वि. ए. व., गायत्र्याः & मातुः- both in स्त्री. लिं. ष. वि. ए. व. of गायत्री- name of a very sacred Mantra, which forms part of the Sandhya-vandana & मातृ- mother, परः- adjctv- see above & मन्त्रः- vedic hymn, sacred prayer, न- no, not अव्यय

**दानेन पाणिर्न तु कङ्कणेन स्नानेन शुद्धिर्न तु चन्दनेन।**
**मानेन तृप्तिर्न तु भोजनेन ज्ञानेन मुक्तिर्न तु मण्डनेन**॥३०२॥ -चाणक्यनीतिदर्पण अ.१७ श्लो.१२

दानेन पाणिः न तु कङ्कणेन, स्नानेन शुद्धिः न तु चन्दनेन, मानेन तृप्तिः न तु भोजनेन, ज्ञानेन मुक्तिः न तु मण्डनेन (विभाति)॥

A real decoration for a hand is an act of giving and not by a bracelet. Proper purification of the body is having a good bath and not by anointing body by sandalwood-paste (perfumes). A real satisfaction is by getting properly respected and not by a good meal. True liberation is achieved by acquiring knowledge and not by mere ornaments.

दानेन, कङ्कणेन, स्नानेन, चन्दनेन, मानेन, भोजनेन, ज्ञानेन & मण्डनेन- all in तृ. वि. ए. व. of दानम्- giving, gifting, कङ्कणः/णम्- a bracelet, स्नानम्- bathing, washing, चन्दनः/नम्- sandal-paste, मानः- respect, honour, regard, भोजनम्- food, eating, object of enjoyment, ज्ञानम्- knowledge, learning, understanding, मण्डनम्- decoration, an ornament, act of adorning, पाणिः- hand- in पु. लिं. प्र. वि. ए.

व., शुद्धिः- purification, cleanness, sanctity, तृप्तिः- satisfaction, happiness & मुक्तिः- deliverance, freedom, liberation, न- no, not, तु- but, on the other hand, न तु- just not by- अव्ययs

**यदि रामा यदि च रमा यदि तनयो विनयगुणोपेतः।**
**तनये तनयोत्पत्तिः सुखमिन्द्रे किमाधिक्यम् ॥**३०३॥ -चाणक्यनीतिदर्पण अ.१७ श्लो.१६

यदि (मनुष्यस्य पत्नी) रामा (अस्ति), यदि (तस्य गृहे) च रमा (वसति), यदि (तस्य) तनयः विनयगुणोपेतः (भवति), (तथा तस्य) तनये तनयोत्पत्तिः (अपि भवति), (तदा) इन्द्रे सुखम् किम् आधिक्यम्?

If one has a beautiful wife, if the goddess of wealth resides (in his house), if he has a very polite son, if that son also is blessed with a son, then, is the happiness of Lord Indra (Indra-Loka) superior to this man?

रामा- charming, beautiful, young woman, रमा- goddess of wealth, Laxmi & तनयोत्पत्तिः- birth of a male descendant- तनयः- पु. लिं.- a son, a male descendant, उत्पत्तिः- birth, production- तनयस्य उत्पत्तिः- ष. तत्पुरुष स.- all in स्त्री. लिं. प्र. वि. ए. व., तनयः,-son & विनयगुणोपेतः- one blessed with very polite disposition- विनय- adjctv- polite conduct decorum, decency, modesty, गुणः- quality, nature, उपेतः- endowed with, विनयः गुणः- विनयगुणः- वि. पू. प. कर्मधारय स. & विनयगुणेन उपेतः- तृ. तत्पुरुष स.- both in पु. लिं. प्र. वि. ए. व., तनये & इन्द्रे- both in पु. लिं. स. वि. ए. व. of तनय- a son & इन्द्र- lord of Gods, सुखम्- happiness, satisfaction, joy & आधिक्यम्- excess, abundance- both in न. लिं. स. वि. ए. व., यदि- if, in case, च- and, किम्- a particle of interrogation: why?, is it?, whether,-all अव्ययs

**दानार्थिनो मधुकरा यदि कर्णतालैः**
**दूरीकृताः करिवरेण मदान्धबुद्ध्या।**
**तस्यैव गण्डयुगमण्डनहानिरेषा**
**भृङ्गाः पुनर्विकचपद्मवने वसन्ति** ॥३०४॥ -चाणक्यनीतिदर्पण अ.१७ श्लो.१८

यदि करिवरेण मदान्धबुद्ध्या, दानार्थिनः, मधुकराः कर्णतालैः दूरीकृताः, एषा तस्य एव गण्डयुगमण्डनहानिः (भवति), भृङ्गाः पुनः विकचपद्मवने वसन्ति॥

It is only his own loss of opportunity for adornments for his temples (by the bees) if that best among the elephants, with an attitude blinded by the arrogance, drives away the bees by flapping of his ears, who approach him solicitously! As for the bees, they merrily go and inhabit fully blossomed lotus thickets once again.

दानार्थिनः, मधुकराः, दूरीकृताः & भृङ्गाः- all in पु. लिं. प्र. वि. ए. व. of दानार्थिन्-one who is expecting something from the other- दानम्- granting, giving, gift, अर्थिन्- solicitor, one who asks- दानस्य अर्थिन् ष. तत्पुरुष स ., मधुकरः- honey bee- मधु- न. लिं.- honey, करः- doer, maker- मधु करोति इति- उपपद तत्पुरुष स., दूरीकृतः-one, who is driven away- दूर- adjctv- कृत- adjctv- done, made- क. भू. धा. वि. of दूरी+कृ- च्वि रूप of करोति कुरुते ८ ग. उ. प. to do, make . & भृङ्गः- large black bee, कर्णतालैः- in पु. लिं. तृ. वि. ब. व. of कर्णतालः- flapping of the ears- कर्णः- the ear, तालः- flapping, clapping, कर्णयोः तालाः - ष. तत्पुरुष स., एषा (एतद्)- this & गण्डयुगमण्डनहानिः- loss of adornment opportunity of the pair of temples- गण्डः- the cheek, temple of an elephant, युगम्-a pair, couple, मण्डनम्- declaration, an act

of adorning, हानिः- loss, a bandonment- गण्डयोः युगम्- गण्डयुगम्, गण्डयुगस्य मण्डनम्- गण्डयुगमण्डनम् & गण्डयुगमण्डनस्य हानिः- गण्डयुगमण्डनहानिः- all ष. तत्पुरुष स.- both in स्त्री. लिं. प्र. वि. ए. व., करिवरेण- in पु. लिं. तृ. वि. ए. व. of करिवरः- the best among the elephants- करिन्- an elephant, वर- adjctv- the best, excellent- करीणाम् वरः- ष. तत्पुरुष स., मदान्धबुद्धया- in स्त्री. लिं. तृ. वि. ए. व. of मदान्धबुद्धिः- with an attitude blinded by the arrogance- मदः- intoxication, rut, pride, arrogance, अन्ध- adjctv- blind, unable to see, बुद्धिः- thinking, mind, attitude- मदेन अन्धः- मदान्धः- तृ. तत्पुरुष स. & मदान्धा बुद्धिः यस्य सः- मदान्धबुद्धिः- बहुव्रीहि स., विकचपद्मवने- in न. लिं. स. वि. ए. व. of विकचपद्मवनम्- thicket of full-blown lotuses- विकच- adjctv- blown, blossomed, पद्मम्- lotus, वनम्- a cluster, thicket of plants- विकचम् पद्मम्- विकचपद्मम् & विकचपद्मानाम् वनम्- ष. तत्पुरुष स., तस्य- his- in पु. लिं. ष. वि. ए. व. of तद्-he, वसन्ति- वर्त. प्र. पु. ब. व. of वस्- वसति १ ग. प. प. to dwell, live, inhabit, यदि- if, in case, एव- only, merely, just & पुनः (पुनर्)- again, once more- all अव्ययs

**राजा वेश्या यमो ह्यग्निस्तस्करो बालयाचकौ ।**
**परदुःखं न जानन्ति अष्टमो ग्रामकण्टकः** ॥३०५॥ -चाणक्यनीतिदर्पण अ.१७ श्लो.१९

राजा, वेश्या, यमः हि, अग्निः, तस्करः, बालयाचकौ (तथा) अष्टमः ग्रामकण्टकः (एते) परदुःखम् न जानन्ति।

A King, a prostitute, the God of death, the fire, a thief, a child and a beggar and the eighth is a village trouble maker do not understand the sorrow of others.

राजा (राजन्)- King, Ruler, यमः- Yama- the God of Death, अग्निः- fire, तस्करः- a thief, robber, अष्टमः- the eighth, ग्रामकण्टकः- a habitually troublesome person in a village- ग्रामः- village, community, कण्टकः- a troublesome person, thorn, source of annoyance- ग्रामस्य कण्टकः- ष. तत्पुरुष स.- all in पु. लि. प्र. वि. ए. व., वेश्या- a prostitute, courtesan, concubine- in स्त्री. लि. प्र. वि. ए. व., बालयाचकौ- a child and a begger- in पु. लि. प्र. वि. द्वि. व.- बालः- a child, याचकः- a begger, seeker of alm- बालः च याचकः च- द्वंद्व स., परदुःखम्- difficulty or hardship of others- परः- the other, another, दुःखम्- sorrow, trouble- परस्य दुःखम्- ष. तत्पुरुष स.-in न. लि. द्वि. वि. ए. व., जानन्ति- वर्त. प्र. पु. ब. व. of ज्ञा- जानाति जानीते ९ ग. उ. प. to know, understand, realise, हि- surely, certainly & न- no, not- both अव्ययs

**अध: पश्यसि किं बाले! पतितं तव किं भुवि।**
**रे रे मूर्ख! न जानासि गतं तारुण्य मौक्तिकम्** ॥३०६॥ -चाणक्यनीतिदर्पण अ.१७ श्लो. २०

बाले, किम् अध: पश्यसि? भुवि तव किम् पतितम्? रे रे मूर्ख! (किम् त्वम्) न जानासि, (मम) गतम् तारुण्य मौक्तिकम् (पश्यामि) ।

(Someone mockingly asks a very old, bent down, woman)-
"Oh, young girl, why are you looking down? Did something of yours fell to the ground?"
(To this she replies)
"Oh, oh, stupid fellow! Don't you understand, it is my lost pearl of youth (that I am looking for)."

बाले- in स्त्री. लिं. सं. वि. ए. व. of बाला- young girl, मूर्ख- in पु. लिं. सं. वि. ए. व. of मूर्खः- a stupid, foolish person, भुवि (भुवाम्)- in स्त्री. लिं. स. वि. ए. व. of भू- ground, earth, तव- yours- ष. वि. ए. व. of युष्मद्- yours- किम्- what & पतितम्- fallen, dropped- क. भू. धा. वि. of पत्- पतति १ ग. प. प. to fall, drop off,

fall down- both in न. लिं. प्र. वि. ए. व., पश्यसि & जानासि- both वर्त. म. पु. ए. व. of दृश्- पश्यति १ ग. प. प. to see, observe & ज्ञा- जानाति जानीते ९ ग. उ. प. to know, understand, realise, गतम्- gone, past- गत- क. भू. धा. वि. of गम्- गच्छति १ ग. प. प. to go & तारुण्यमौक्तिकम्- a pearl of youth- तारुण्यम्- youth, youthfulness, मौक्तिकम् - a pearl- तारुण्यम् मौक्तिकम् इव- उ. उ. प. कर्मधारय स.- both in न. लिं. द्वि. वि. ए. व., किम्- a particle of interrogation- why, अध: (अधस्)- below, down, downwards, न- no, not & रे- a vocative particle- Oh, Look- all अव्ययs

**परोपकरणं येषां जागर्ति हृदये सताम्।**
**नश्यन्ति विपदस्तेषां सम्पदः स्युः पदे पदे** ॥३०७॥ -चाणक्यनीतिदर्पण अ.१७ श्लो. १५

येषाम् सताम् हृदये परोपकरणम् जागर्ति, तेषाम् विपदः नश्यन्ति (तथा तेषाम्) सम्पद: पदे पदे स्यु: ॥

The misfortunes of virtuous people in whose heart benevolence of others is alive, get destroyed. Let they be bestowed with prosperity at every step!

येषाम्- whose, सताम् & तेषाम्- their- all in पु. लिं. ष. वि. ए. व. of यद्- who, सत्- noble or virtuous person & तद्- he, हृदये- in न. लिं. स. वि. ए. व. of हृदयम्- mind, heart, परोपकरणम्- benevolence of others- पर- adjctv- other, another, उपकरणम्- doing service or favour, helping- परस्य उपकरणम्- ष. तत्पुरुष स.- in न. लिं. प्र. वि. ए. व., जागर्ति- वर्त. प्र. पु. ए. व. of जागृ- २ ग. प. प. to be awake, attentive, विपदः & सम्पद:- both in स्त्री. लिं. प्र. वि. ब. व. of विपद्- calamity, misfortune, distress & सम्पद्- wealth, riches, prosperity, नश्यन्ति- वर्त. प्र. पु. ब. व. of नश्- नश्यति ४ ग. प. प. to get destroyed, to get ruined, पदे- in न. लिं. स. वि. ए. व. of पदम्- step, पदे पदे- at every step, constantly, repeatedly, स्यु:- विध्यर्थ प्र. पु. ब. व. of अस्- अस्ति २ ग. प. प. to be, to happen, to exist

**ऐक्यं बलं समाजस्य तदभावे स दुर्बलः।**
**तस्मादैक्यं प्रशंसन्ति दृढं राष्ट्रहितैषिणः॥**३०८॥ -असम-संस्कृतसाहित्यम्

ऐक्यम् समाजस्य बलम् (भवति), तद् अभावे सः (समाजः) दुर्बलः (भवति)। तस्मात् राष्ट्रहितैषिणः दृढम् ऐक्यम् प्रशंसन्ति॥

Unity is the strength of any society. Its absence makes the society weak. Therefore the well-wishers of a nation strongly advocate for the unity (among its subjects).

ऐक्यम्- unity, oneness, unanimity & बलम्- strength, strong point- both in न. लिं. प्र. वि. ए. व., तदभावे- in पु. लिं. स. वि. ए. व. of तदभावः- its non-existence, its absence- तद्- that, it, भावः- existence, state of being- न भावः- अभावः- absence- नञ् तत्पुरुष स. & तस्य अभावः- तदभावः- ष. तत्पुरुष स., सः (तद्)- he & दुर्बलः- weak, powerless feeble- दुरितम् बलम् यस्य सः- बहुव्रीहि स.- both in पु. लिं. प्र. वि. ए. व., समाजस्य- in पु. लिं. ष. वि. ए. व. of समाजः- society, community, association, party, ऐक्यम्- in न. लिं. द्वि. वि. ए. व., प्रशंसन्ति- वर्त. प्र. पु. ब. व. of प्र+ शंस्- to praise, approve, command, advocate- (शंस्- शंसति १ ग. प. प. to tell, relate, declare, indicate), राष्ट्रहितैषिणः- in पु. लिं. प्र. वि. ब. व. of राष्ट्रहितैषिन्- one desiring well-being of a country, state- राष्ट्रम्- country, state, हितम्- well-being, good, beneficial- हित- क. भू. धा. वि. of हि- हिनोति ५ ग. प. प. to gratify, please, promote- राष्ट्रस्य हितम्- राष्ट्रहितम्- ष. तत्पुरुष स. &

राष्ट्रहितम् इच्छति इति- राष्ट्रहितैषिन्- उपपद तत्पुरुष स., तस्मात्- therefore, because of this & दृढम्- firmly, vehemently, forcefully, very much- both अव्ययs

**विपत्तिष्वव्यथो दक्षो नित्यमुत्थानवान्नरः।**
**अप्रमत्तो विनीतात्मा नित्यं भद्राणि पश्यति**॥३०९॥ -महाभा. सभापर्व२.८०.११, वैदिकवाङ्मयम्

(यः) नरः विपत्तिषु अव्यथः, दक्षः, नित्यम् उत्थानवान्, अप्रमत्तः, विनीतात्मा, (अस्ति, सः) नित्यम् भद्राणि पश्यति॥

A person, who does not worry about his troubles, is competent in his work, is always active, is careful and well-behaved, always achieves favourable results.

विपत्तिषु- स्त्री. लिं. स. वि ब. व. of विपत्तिः- calamity, disaster, misfortune, trouble- अव्यथः- one who is free from worry, pain- व्यथा- pain, anguish, anxiety- न व्यथा यस्य सः- अविद्यमानव्यथः or अव्यथः- नञ्बहुव्रीहि स., दक्षः- competent, skilful, careful, उत्थानवान्- active, exerting, progressive, नरः- man, person, अप्रमत्तः- careful, attentive- प्रमत्तः- careless, negligent, mad, insane- क. भू. ध. वि. of प्र+ मद्- to be careless, negligent- (मद्- माद्यति- ४ ग. प. प. to be drunk, mad)- न प्रमत्तः- अप्रमत्तः- नञ् तत्पुरुष स., विनीतात्मा-one, who is of modest or well-behaved nature- विनीत- humble, well-behaved, modest- क. भू. ध. वि. of वि+नि+ इ- to be humble, modest- (इ- एति २ ग. प. प. to go), आत्मन्- soul, self, nature, character, disposition- विनीतः आत्मा यस्य सः- बहुव्रीहि स.-all in पु. लिं. प्र. वि. ए. व., भद्राणि- न. लिं. द्वि. वि. ब. व. of भद्रम्- adjctv- auspicious, good fortune, favourable, पश्यति- वर्त. प्र. पु. ए. व. of दृश्- १ ग. प. प. to see, behold, discover, happen to see, नित्यम्- always, everyday- अव्यय

**तृषां धरायाः शमयत्यशेषां**
**यः सोऽम्बुदो गर्जति गर्जतूच्चैः ।**
**यस्त्वेष कस्यापि न हन्ति तृष्णां**
**स किं वृथा गर्जति निस्त्रपोऽब्धिः॥** ३१०॥ -सुभाषितरत्नभाण्डागारम्, वैदिकवाङ्मयम्

यः धरायाः तृषाम् अशेषाम् शमयति सः अम्बुदः गर्जति, (सः) उच्चैः गर्जतु। यः कस्य अपि तृष्णाम् न हन्ति, सः एषः निस्त्रपः अब्धिः, तु किम् वृथा गर्जति?

This cloud, which completely quenches the thirst of the earth, thunders. Let him thunder even louder! But why this shameless ocean, who does not quench the thirst of any one, is unnecessarily making loud noise?

तृषाम् /तृष्णाम् & अशेषाम्- all in स्त्री. लिं. द्वि. वि. ए. व. of तृषा/तृष्णा- thirst, strong desire & अशेषा- completely, fully, without remainder- शेष- adjctv- balance, residue, remaining, rest- न शेष- अशेष- नञ् तत्पुरुष स., धरायाः- in स्त्री. लिं. ष. वि. ए. व. of धरा- earth, शमयति- प्रयोजक वर्त. प्र. पु. ए. व. of शम्- to soothe, tranquilize, to put an end, to stop, यः (यद्)-who, सः (तद्)- he, that, अम्बुदः- a cloud- अम्बु- न. लिं.- water- अम्बु ददाति इति-उपपद तत्पुरुष स., एषः (एतद्)- he, this, अब्धिः- receptacle of water, ocean- अप्- स्त्री. लिं.- water- (decline in classical language only in plural- आपः अपः अद्भिः), धिः- स्त्री. लिं.- a store, receptacle- अपाम् धिः- अब्धिः- ष. तत्पुरुष स. & निस्त्रपः- shameless, impudent- त्रपा- स्त्री. लिं.- modesty, shame- निर्गता त्रपा यस्मात् सः- बहुव्रीहि स.- all in पु. लिं. प्र. वि. ए. व., गर्जति & हन्ति- both in वर्त. प्र. पु. ए. व. of गर्ज्- to roar, thunder-१ ग. प. प. & हन्- २ ग. प. प. to strike, kill, destroy, गर्जतु- आज्ञार्थ प्र.

पु. ए. व. of गर्ज्- to roar, कस्य- in पु. लिं. ष. वि. ए. व. of किम्- who, अपि- also, even, किम्- a particle of interrogation- why, उच्चैः- aloud, loudly, very much, वृथा- unnecessarily, in vain, pointlessly, तु- but, on the other hand, न- no, not- all अव्ययs

**लये संबोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः ।**
**सकषायं विजानीयात्समप्राप्तं न चालयेत्॥**३११॥ -मण्डूक्योपनिषद् कारिका ३.४४

(मनुष्यः) लये चित्तम् संबोधयेत् । विक्षिप्तम् (चित्तम्) पुनः शमयेत् । (चित्तम्) सकषायम् विजानीयात् । समप्राप्तम् (चित्तम्) न चालयेत् ॥

When the mind becomes dull (feels low), it should be awakened. If it gets agitated, it should be calmed down again. One should understand that the mind is full of desires (emotions). Once it reaches a state of equilibrium, it should not be disturbed.

लये- in पु. लिं. स. वि. ए. व. of लयः- slackness of mind, feeling dull, चित्तम्- mind, heart, thought, thinking, विक्षिप्तम्- distracted, agitated, disturbed- विक्षिप्त- क. भू. धा. वि. of वि+ क्षिप्- to divert, distract- (क्षिप्- क्षिपति- ते ६ ग. उ. प. to cast, , send), सकषायम्- full of desire, emotions- कषाय- adjctv- passion, emotion, desire- कषायेन सह- सकषाय- सहबहुव्रीहि स. & समप्राप्तम्-Having obtained equilibrium - all in न. लिं. द्वि. वि. ए. व., संबोधयेत्, शमयेत्, चालयेत् & विजानीयात्- all प्रयोजक विध्यर्थ प्र. पु. ए. व. of सं+ बुध्- संबोधयति - ते- to awaken, to make aware, to address- (बुध्- बोधति ते & बुध्यते १ उ. प. & आ. प. ४ to know, understand), शम्- शमयति ते- to calm, tranquilize, soothe- (शम्- शाम्यति ४ ग. प. प. to be calm, quiet & चल्- चालयति- to cause to move, stir, shake- (चल्- चलति १ ग. प. प. to shake, move) & वि + ज्ञा- विजानीयति- ते to understand well, know well- (ज्ञा- जानाति जानीते ९ ग. उ. प. to know, understand), पुनः (पुनर्)- again, once more, न- both अव्ययs

**नास्ति वै जातितः शत्रुः पुरुषस्य विशाम्पते ।**
**येन साधारणी वृत्तिः स शत्रुर्नेतरो जनः** ॥३१२॥-महाभा. सभापर्व २.८१.१५ वैदिकवाङ्मयम्

विशाम्पते, पुरुषस्य जातितः वै शत्रुः न अस्ति। येन साधारणी वृत्तिः (भवति), सः शत्रुः (जायते), न इतरः जनः (शत्रुः भवति) ॥

Oh King, a person does not indeed have an enemy right from his birth. One develops enmity with a person with a similar occupation, not with others.

विशाम्पते- in पु. लिं. सं. वि. ए. व. of विशाम्पतिः- king, Lord of subjects- विश्- पु. लिं- a Vaishya, man in general, पतिः- husband, Lord- विशाम् पतिः- ष. तत्पुरुष स., पुरुषस्य- in पु. लिं. सं. वि. ए. व. of पुरुषः- a man person, जातितः- from birth, due to birth, जातिः- स्त्री. लिं.-birth, race, class- तस्- suffix implies पं. वि.- by, from, शत्रुः- enemy, adversary, सः (तद्)- he, that, इतरः- other, another, जनः- person, people- all in पु. लिं. प्र. वि. ए. व., अस्ति- वर्त. प्र. पु. ए. व. of अस्- २ ग. प. प. to be, to exist, येन- by which, whom- in पु/न. लिं. प्र. वि. ए. व. of यद्- who, what, साधारणी (साधारण- adjctv)- common, ordinary, general & वृत्तिः- occupation, business, mode of leading life- both in स्त्री. लिं. प्र. वि. ए. व., वै- certainly, surely, न- no, not both अव्ययs

**आपदामापतन्तीनां हितोऽप्यायाति हेतुताम्।**
**मातृजङ्घा हि वत्सस्य स्तम्भीभवति बन्धने** ॥३१३॥ - हितोपदेश

आपदाम् आपतन्तीनाम् हितः अपि हेतुताम् आयाति । मातृजङ्घा हि वत्सस्य बन्धने स्तम्भीभवति॥

When afflicted by calamities, even a well-wisher may be the cause of it. Mother's thighs become the bondage for the calf (when it is hungry and cannot drink her milk).

*A calf is tied to its mother's thighs when the owner wants to milk the cow. Thus the mother cow becomes the reason for the calf's not getting milk, its calamity!*

आपदाम् & आपतन्तीनाम्- both in स्त्री. लिं. ष. वि. ब. व. आपद्- calamity, misfortune, trouble & आपतन्ती- one that is falling- आपतत्- पु. लिं)- कर्तरि वर्त. का. वा. ध. सा. वि. of आ+ पत्- to fall upon, attach- (पत्- पतति १ ग. प. प. to fall, fall down,हितः- well-wisher, friendly, kind- in पु. लिं. प्र. वि. ए. व., हेतुताम्- in स्त्री. लिं. द्वि. वि. ए. व. of हेतुता- existence of cause, causation- हेतुः,- cause, purpose, reason- ता- suffix implies cause, मातृजङ्घा- mother's thighs- मातृ- mother, जङ्घा- thigh, legs- मातुः जङ्घा- ष. तत्पुरुष स.- in स्त्री. लिं. प्र. वि. ए. व., वत्सस्य- in पु. लिं. ष. वि. ए. व. of वत्सः- child, son, बन्धने- in न. लिं. स. वि. ए. व. of बन्धनम्- act of binding, clasping, bondage, bond, स्तम्भीभवति & आयाति- both वर्त. प्र. पु. ए. व. of स्तम्भीभू- to be a pillar of support- (स्तम्भः- support, pillar, rigidity- भू- भवति १ ग. प. प. to be, to exist, become) & आ+ या- to become, attain, to come to- (या- याति २ ग. प. प. to go), अपि- also, even & हि- alone, only, surely- both अव्ययs

**कृत्वा पापं हि संतप्य तस्मात्पापात्प्रमुच्यते ।**
**नैवं कुर्यां पुनरिति निवृत्त्या पूयते तु सः** ॥३१४॥ -मनुस्मृति- ११.२३०, असम-संस्कृतसाहित्यम्

(मनुष्यः) पापम् कृत्वा संतप्य हि तस्मात् पापात् प्रमुच्यते (तथा) पुनः न एवम् कुर्याम् इति निवृत्त्या तु सः पूयते।

A person, after committing a crime, gets liberated only after he repents. By resolving not to commit such a crime again and then abstaining from it, he gets cleansed of the crime.

पापम्- sin, crime, forbidden thing- in न. लिं. द्वि. वि. ए. व., कृत्वा- पू. का. वा. त्वान्त धा. सा. अव्यय of कृ- करोति कुरुते ८ ग. उ. प. to do, make, commit, संतप्य- पू. का. वा. ल्यबन्त धा. सा. अव्यय of सं+ तप्- to repent, to suffer pain, to be distressed- (तप्- तपति १ ग. प. प. to be hot, to suffer pain, blaze), तस्मात् & पापात्- both in न. लिं. पं. वि. ए. व. of तद्- that & पापम्- sin, प्रमुच्यते- gets liberated- कर्मणि प्रयोग वर्त. प्र. पु. ए. व. of प्र+ मुच्- to liberate, free- (मुच्- मुन्चति- ते ६ ग. उ. प. to set free), कुर्याम्- वर्त. उ. पु. ए. व. of कृ- see above, निवृत्त्या- in स्त्री. लिं. तृ. वि. ए. व. of निवृत्तिः- abstaining from, cessation, termination, सः (तद्)- he- in पु. लिं. प्र. वि. ए. व., पूयते- वर्त. प्र. पु. ए. व. of पू- ४ ग. आ. प. to purify, cleanse, refine, पुनः (पुनर्)- again, once more, न- no, not, एवम्- like this, in this manner, इति- a particle used to report the very words spoken- thus & तु- but, on the other hand- all अव्ययs

**अद्वारेण रिपोर्गेहं द्वारेण सुहृदो गृहान् ।**
**प्रविशन्ति नरा धीरा द्वाराण्येतानि धर्मतः** ॥३१५॥ -महाभा,सभापर्व २१.५३, वैदिकवाङ्मयम्

धीराः नराः अद्वारेण रिपोः गेहम् प्रविशन्ति ,(तथा) द्वारेण सुहृदः गृहान् (प्रविशन्ति)। एतानि द्वाराणि धर्मतः वर्तन्ते॥

(Said by Shrikrishna to Jarasanda)

Wise people enter the house of an enemy through a non- entry point. They enter houses of friends through the proper door. These are the means of entrances according to the prescribed codes of conduct- Dharma

नराः & धीराः- both in पु. लिं. प्र. वि. ब. व. of नरः- a person, man & धीरः- adjctv- brave, courageous, strong-minded, द्वारेण & अद्वारेण- both in न. लिं. तृ. वि. ए. व. of द्वारम्- door, gate, entrance & अद्वारम्- न द्वारम्- नञ् तत्पुरुष स.- non- entrance, रिपोः & सुहृदः- both in पु. लिं. ष. वि. ए. व. of रिपु- an enemy, adversary & सुहृद्- a friend, good-hearted, dear, affectionate- सु- अव्यय- prefix implies 'good', 'excellent', हृद्- न. लिं.- mind, heart- this word has no forms for first five inflections- सुभगः हृदि यः सः- सुहृद्- बहुव्रीहि स., गेहम्- house, , habitation- in न. लिं. द्वि. वि. ए. व., गृहान्- in पु. लिं. द्वि. वि. ब. व. of गृहः- house, home, abode, प्रविशन्ति- in वर्त. प्र. पु. ब. व. of प्र+ विश्- to enter, to enter upon- (विश्- विशति ६ ग. प. प. to enter, to go, to settle down), द्वाराणि & एतानि- both in न. लिं. प्र. वि. ब. व. of द्वारम्- door & एतद्- this, it, धर्मतः- as per/ according to prescribed codes of conduct or Dharma- धर्मः- prescribed codes of conduct or Dharma, तः (तस्)- suffix implies पं. वि.- 'from'